(11)

S.K.M 104/89 (h)

श्रीमद् भागवत "अष्टम स्कंध"

समय २८ वी० श०

पत्र ६३

भाषा संस्कृत

-३२-

तम हन्॥१३॥सविश्वकायःपुरुहूत
याल्मशान्या॥तं विद्यायोघस
॥इह मानोहिपुरुषःआयोऽनीहं
त्मलाभेनपूर्णार्थोनावसीदंतियन्तु
नेराशिखंपूर्णमनन्यचोदितं॥नत
भावनं॥१७॥श्रीशुक उवा
मभ्पेऊ

सत्यमामा

SKM 104/89(h

श्रीभा० स्कं०

१

॥श्रीगणेशायनमः॥ ॐनमः॥ श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमान
सनिवासाय श्रीरामचंद्राय नमः॥ १ ॥ अथाष्टमे चतुर्विंशत्यध्यायैर्मनुवर्णनं॥ तत्तु तैः स्कं
धेदेवं द्वैर्मूर्तिभिश्चहरेःसह॥ १ ॥ प्रतिमन्वंतरे चैवमन्वाद्याः षट् पृथक् पृथक्॥ प्रव
र्तयंति सद्धर्मान् पालयंत्याचरंतिच॥ २ ॥ अतोमन्वंतरस्योक्तं सद्धर्मेश इतिलक्षणं॥ येने
वक्रियमाणेन नरोन निरयं व्रजेत्॥ ३ ॥ तत्रतु प्रथमे स्वायंभुवः स्वारोचिषस्तथा॥
उत्तमस्तामसश्चेति चतुर्मनु निरूपणं॥ ४ ॥ स्वायंभु[illegible]रेऽनेन दुरंतः गुणवर्ण
नात्॥ मुरितपरिपप्रच्छ सर्वमन्वंतरस्थि[illegible]भिः॥ ॥
॥राजोवच॥ स्वायंभुवस्येहगुरो वंशोयं[illegible]मनून्
नन्यान्वदस्वनः॥ तत्र धर्मोहि विवि[illegible]यत्र हरे
र्जन्मकर्माणि च महीयसः॥ गृणंति क[illegible]ता॥ २ ॥ यद्य
स्मिन्नंतरे ब्रह्मन् भगवान् विश्वभा[illegible]ीतेनागतेःद्य

राम०

१

श्री भा० अ० रं व हिः॥ विश्वस्याऽमूनि यद्यस्माद्विश्वंच तदृतं महत्॥१३॥ सविश्वकायः पुरुहूत ईशः॥ सत्यः स्व
२ यंज्योतिरजः पुराणः॥ धत्तेऽस्य जन्माद्यजयात्मशक्त्या॥ तां विद्ययोदस्य निरीह आस्ते॥१
४॥ अथाग्रे ऋषयः कर्माणीहंतेकर्महेतवे॥ ईहमानोहि पुरुषः प्रायोऽनीहांप्रपद्यते॥१५॥
ईहतेभगवानीशोनहितत्रविषज्जते॥ आत्मलाभेनपूर्णार्थोनावसीदंतियेनुतं॥१६॥ श्री
शुक उवाच॥ तमीहमानंनिरहंकृतंबुधं॥ निराशिषंपूर्णमनन्यचोदितं॥ नॄन् शिक्षयं
तंनिजवर्त्मसंस्थितं॥ प्रभुंप्रपद्येऽखिलधर्मभावनं॥१७॥ श्रीशुक उवाच॥ इतिमंत्रोप
निषदंव्याहरंतंसमाहितं॥ दृष्ट्वासुरायातुधानाजग्धुमभ्यद्रवन्क्षुधा॥१८॥ तांस्तथा
वसितान्वीक्ष्य यज्ञः सर्वगतोहरिः॥ यामैः परिवृतोदेवैर्हत्वाऽशासत्त्रिविष्टपं॥१९॥ स्वा
रोचिषोद्वितीयस्तु मनुरग्नेः सुतोऽभवत्॥ द्युमत्सुषेणरोचिष्मत्प्रमुखाः॥ तस्यचात्म
जाः॥२०॥ तत्रेंद्रोरोचनस्त्वासीद्देवाश्चतुषितादयः॥ ऊर्जस्तंभादयः सप्तऋषयोब्रह्मवा
दिनः॥२१॥ ऋषेस्तुवेदशिरसस्तुषितानामपत्न्यभूत्॥ तस्यांयज्ञेततोदेवोविभुरित्य

वा॥३॥ऋषिरुवाच॥मनवोस्मिन्व्यतीताः षट् कल्पेस्वायंभुवदयः॥आद्यस्ते कथितोयत्रदे
वादीनां च संभवः॥४॥आकूत्यां चदेवहूत्यां च दुहितस्तस्य वै मनोः॥धर्मज्ञानोपदेशार्थं भगवान्पु
त्रतांगतः॥५॥कृतं पुराभगवतः कपिलस्यानुवर्णितं॥आख्यास्ये भगवान्यज्ञो यच्च
कारकुरूद्वह॥६॥विरक्तः कामभोगेषु शतरूपापतिः प्रभुः॥विसृज्य राज्यं तपसे स
भार्यो वनमाविशत्॥७॥सुनंदायां वर्षशतं पदैकेन भुवं स्पृशन्॥तप्यमानस्तपो
घोरमिदमन्वाह भारत॥८॥मनुरुवाच॥येन चेतयते विश्वं विश्वं चेतयते न यं॥योजा
नायं तपते विश्वं विश्ववीर्यंचयत तपः॥९॥येनचेतयते विश्वं विश्वंचेतयतेनयं॥योजा
गर्तिशयानेस्मिन्नायंतं वेद वेद सः॥१०॥आत्मावास्यमिदं विश्वं यत्किंचिज्जगत्यांज
गत्॥तेन त्यक्तेनभुंजीथा मागृधः कस्यचिद्धनं॥११॥यन्नपश्यतिपश्यंतं चक्षुर्यस्यन
रिष्यति॥तंभूतनिलयं देवंसुवर्णमुपधावत॥१२॥नयस्याद्यंतमध्यं च स्वः परोनांत

श्रीभा०अ०
२

वंसतुवादरायणिः ॥ प्रायोपविष्टेनकथासुचोदितः ॥ उवाचविप्राःप्रतिनंद्यपार्थिवं ॥
मुदामुनीनांसदसिस्मशृण्वतां ॥३४॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेमन्वंत
रानुवर्णनंनामप्रथमोध्यायः ॥१॥ तुर्येमन्वंतरेप्येवंगजेंद्रस्यविमोक्षणं ॥ द्वितीयादित्रि
भिस्तंतुविस्तरेणोपवर्ण्यते ॥१॥ द्वितीयेतुगजेंद्रस्त्रीभिःक्रीडितोजले ॥ दैवाद्ग्राहग्र
हीतस्यहरिस्मृतिउदीर्यते ॥२॥ ॥ श्रीशुकउवाच ॥ आसीद्गिरिवरोराजंस्त्रिकूट
इतिविश्रुतः ॥ क्षीरोदेनावृतःश्रीमान्योजनायुतमुच्छ्रितः ॥१॥ तावताविस्तृतःपर्यक्त्रि
भिःशृंगैःपयोनिधिं ॥ दिशःखंरोचयन्नास्तेरौप्यायसहिरण्मयैः ॥ अ[illegible]न्यैःककुभःसर्वार
त्नधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झराम्भसां ॥३॥ सचा[illegible]जेमाना
घ्रिःसमंतात्पयऊर्मिभिः ॥ करोतिश्यामलांभूमिंहरिन्मरकताश्मभिः ॥४॥ सिद्धचार
णगंधर्वविद्याधरमहोरगैः ॥ किन्नरैरप्सरोभिश्चक्रीडद्भिर्जुष्टकंदरः ॥५॥ यत्रसं
गीतसन्नादैर्नदद्गुहममर्षया ॥ अभिगर्जंतिहरयःश्लाघिनःपरशंकया ॥६॥ नानारण

 धर्मस्य सूनृतायां तु भगवान् पुरुषोत्तमः ॥ सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह ॥२१॥ 
मि विश्रुतः ॥२२॥ अष्टाशीति सहस्राणि मुनयो ये धृतव्रताः ॥ अन्वशिक्षन्व्रतं तस्य कौमार ब्रह्म
चारिणः ॥२३॥ तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः ॥ पवनः सृंजयो यज्ञहोत्राद्यास्तत्सु
ता नृपाः ॥२४॥ वशिष्ठतनयाः सप्त ऋषयः प्रमदादयः ॥ सत्या वेदश्रुता भद्रा देवा इंद्रस्तु
सत्यजित् ॥२५॥ सोनृतव्रतदुःशीलानसतो यक्षराक्षसान् ॥ भूतद्रुहो भूतगणांस्त्वव
धीत्सत्यजित्सखः ॥२७॥ चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः ॥ पृथुः ख्यातिर्नरः केतु
रित्याद्या दश तत्सुताः ॥२८॥ सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ॥ ज्योतिर्धामादयः
सप्त ऋषयस्तामसेंतरे ॥२९॥ देवा वैधृतयो नाम विधृतेस्तनया नृपाः ॥ नष्टा कालेन
यैर्वेदाः विधृताः स्वेन तेजसा ॥३०॥ तत्रापि जज्ञे भगवान्हरिण्यां हरिमेधसः ॥ हरि
रित्याहृतो येन गजेंद्रो मोचितो ग्रहात् ॥३१॥ श्रीराजोवाच ॥ बादरायण एतत्ते श्रोतुमि
च्छामहे वयं ॥ हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत् ॥३२॥ तत्कथासु महत्पुण्यं धन्यं
स्वस्त्ययनं शुभं ॥ यत्र यत्रोत्तमश्लोको भगवान् गीयते हरिः ॥३३॥ सूत उवाच ॥ परीक्षिते

श्रीभा०अ० यरजः पयः ॥ कदंबवेतसनलनीपवंजुलकैर्वृतं ॥१७॥ कुंदैः कुरवकाशोकैः शिरीषै
४ कुटजेंगुदैः ॥ कुब्जकैः स्वर्णजूथीभिर्नागपुन्नागजातिभिः ॥१८॥ मल्लिकाशतपत्रैश्च
माधवीजालकादिभिः ॥ शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलंद्रुमैः ॥१९॥ तत्रैकदा
तद्गिरिकाननाश्रयः ॥ करेणुभिर्वारणयूथपश्चरन् ॥ सकंटकान्कीचकवेणुवे
त्र ॥ विशालगुल्मंप्ररुजन्वनस्पतीन् ॥२०॥ यद्गंधमात्राद्धरयोगजेंद्रा व्याघ्राद
यो व्यालमृगाः सखड्गाः ॥ महोरगाश्चापि भयाद्द्रवंति सगौरकृष्णाः सरभाश्चमर्यः ॥
२१॥ वृकावराहामहिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च ॥ अन्यत्र क्षुद्राहरिणाः
शशादयश्चरंत्यभीता यदनुग्रहेण ॥२२॥ स घर्मतप्तः करिभिर्वृतोमदच्युत्करभैरनु
द्रुतः ॥ गिरिंगरिम्णापरि[illegible] प[illegible]षेव्यमाणोऽलिकुलैर्मदाशनैः ॥२३॥ सरोनिलंपं
कजरेणुरूषितंजिघ्रन्विदूरान्मदविह्वलेक्षणः ॥ वृतः स्वयूथेनतृषार्दितेन तत्सरो राम०
वराभ्यासमथागमद्द्रुतं ॥२४॥ विगाह्य तस्मिन्नमृतांबुनिर्मलहेमारविंदोत्पलरेणुवा ४

पशुव्रातसंकुलं द्रोण्यलंकृतः ॥ चित्रद्रुमसरोघनकलकंठविहंगमः ॥ ७ ॥ सरित्सरो
भिरच्छोदैः पुलिनैर्मलिवालुकैः ॥ देवस्त्रीमज्जनामोदसौरभांबुनिलैर्युतः ॥ ८ ॥
तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः ॥ उद्यानमनुमन्वामक्रीडं सुरयोषितां
॥ ९ ॥ सर्वतोलंकृतं दिव्यैः नित्यपुष्पफलद्रुमैः ॥ मंदारैः पारिजातैश्च पाटलाशोकचं
पकैः ॥ १० ॥ चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि ॥ क्रमुकैर्नालिकेरैश्च खर्जूरैर्बी
जपूरकैः ॥ ११ ॥ मधुकैः शालजालैश्च तमालैः शरलार्जुनैः ॥ अरिष्टोडुंबरप्लक्षैर्वटैः
किंशुकचंदनैः ॥ १२ ॥ पिचुमंदैः कोविदारैः शालैश्च सुरदारुभिः ॥ द्राक्षेक्षुरंभाजंबू
भीर्बदर्यक्षाभयामलैः ॥ १३ ॥ बिल्वैः कपित्थैर्जंबीरैर्वृतो भल्लातकादिभिः ॥ तस्मि
न्सरः सुविपुलं लसत्कांचनपंकजं ॥ १४ ॥ कुमुदोत्पल कल्हारशतपत्रश्रियोर्जितं ॥
मत्तषट्पदनिर्घुष्टं शकुंतैश्च कलस्वनैः ॥ १५ ॥ हंसकारंडवाकीर्णं चक्राह्वैः सारसै
रपि ॥ जलकुक्कुटकोयष्टिदात्यूहकलकूजितं ॥ १६ ॥ मत्स्यकच्छपसंचारचलत्प

श्रीभा०अ० मिमे ज्ञातयः श्चातुरंगजाः कुतः करिण्यः प्रभवंति तिच्चितुं ॥ ग्राहेण पाशेन विधातुरावृ
५ तोप्यहं च तं यामि परं परायणं ॥३२॥ यः कश्चिनेशो वलिनोंतकोरगात्प्रचंड वेगा
दभिधावतोभृशं भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं गमीमही ॥३३॥
श्रीशुक उवाच ॥ एवं व्यवसितो वुध्यासमाधाय मनो हृदि ॥ जजाप परमं जाप्यं प्राग्ज
न्मन्यनुशिक्षितं ॥३४॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे द्वितीयोध्याय ॥२॥ तृ
तीयेतु गजेंद्रस्तोत्रो हरिरूपेण तं समुद्धारतं ग्राहा [illegible] लो [illegible] पादनः ॥१॥ ॥ शुकउवा
च ॥ एवं व्यवसितो बुध्यासमाधाय मनो हृदि ॥ [illegible] प्रा [illegible] न्मन्यनुशिक्षि
तं ॥१॥ गजेंद्र उवाच ॥ ॐ नमो भगवते तस्मै यत ए [illegible] बीजायपरेशा
याभिधीमही ॥२॥ यस्मिन्निदं यतश्चेदं येनेदं य [illegible] परस्माच्च परस्तं प्रप राम०
द्ये स्वयंभुवं ॥३॥ यः स्वात्मनीदं निजमाययार्पितं क्व [illegible] तं क्व च तत्तिरोहितं ॥ अविद्ध ५

सितं ॥ पपौ निकामं निजपुष्करोद्धृतं ॥ म... मानमद्भिः सपयत्नमुल्लमः ॥ २५ ॥ स्वपुष्करेणोद्धृत
शीकरां बुभिः ॥ निपाययन्... यथान्यथाग्रही ॥ ६६ ... मोदसेमल्लां... मदो ॥ नाचष्ट
हाकुं हपणो ऽजमः य... दंत... ब्रिन्नएदेवनमनुमन्चामश्चाक्रौ ... ग्रश्वरेणे रू
षायहीतः ॥ यदृच्छयै नं वसनं गतो यथा ॥ तथा... मंदौरैः पारिजातैश्च पा... ॥ २७ ॥ तथा च
रं यत्प्रतिकरेण ॥ विहंगमौ भाएंतरसा वलीयसा ॥ ...मकुन्... यो ऽपरे गजा
पाश्चिग्रहात्तारयितुं न चाशकन् ॥ २८ ॥ नियुध्यतोरे... नैः ॥ ...त्रयो ॥ विकर्षतोरंतरतो
वहिर्मिथः ॥ समाः सहस्रं व्यगमन्महीपते ॥ सप्राण... न्नमंसतामराः ॥ २९ ॥ ततो गजें
द्रस्य मनोवलौजसां कालेन दीर्घेण महानभूद्व्ययः ॥ विकृष्यमाणस्य जले वसीदतो वि
पर्ययो भूत्सकलं जलौकसः ॥ ३० ॥ इत्थं गजेन्द्रः स यदाप संकटं प्राणस्य देही विवशो
यदृच्छया ॥ अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभिपद्यत ॥ ३१ ॥ नामा

श्रीभा० स्तो०
६

ते ॥ निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥१२॥ क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे ॥ पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥१३॥ सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे ॥ असताच्छाययोक्ताय सदाभासाय ते नमः ॥१४॥ नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय ॥ सर्वागमाम्नायमहार्णवाय नमोऽपवर्गाय परायणाय ॥१५॥ गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय ॥ नैःकर्म्यभावेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि ॥१६॥ मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय नमोऽलयाय ॥ स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते ॥१७॥ आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुष्प्रापणाय गुणसंगविवर्जिताय ॥ मुक्तात्मभिः स्वहृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय ॥१८॥ यं धर्मकामार्थविमुक्तिकामा भजन्त इष्टां गतिमाप्नुवन्ति ॥ किं त्वाशिषो रा

राम०
६

दकुसास्त्रभयंतदी ... तेसआत्मा लोऽवतुमांपरात्पर ... कालेनपंचत्वमितेषु कृत्स्न
शो लोकेषु च सर्वे हेतुषु ॥ तमस्तदासीद्गहनंगभीरं ... गजितविभुः ॥
५॥ नयस्यदेवारूषयः ... विदुर्जंतुः पुनः कोऽर्हति ... चोदितो ॥ ग्राहो ... तिर्मिर्वि
वेष्टितो दुरत्यया नुक्रमणः सभावितु ॥ ६॥ दिदृ ... लैसो नि वलोविच ... मुक्तसंगाः
मुनयः सुसाधवः ॥ चरंत्यलोकव्रतमव्रणंवने भूतात्म ... गतिः ॥ ७॥ न
विद्यते यस्य च जन्म कर्मवा न नामरूपे गुणदोष एव वा ... पापिलोकाप्ययसंभवा
य यः स्वमायया तान्यनु कालमिछति ॥ ८॥ तस्मैनमः परेशाय ब्रह्मणेऽनंतशक्तये ॥ अ
रूपायोरुरूपाय नम आश्चर्यकर्मणे ॥ ९॥ नमः आत्मप्रदीपाय साक्षिणे परमात्मने ॥
नमो गिरां विदूराय मनसश्चेतसामपि ॥ १०॥ सत्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता ॥
नमः कैवल्यनाथाय निर्वाणसुखसंविदे ॥ ११॥ नमः शांताय घोराय मूढाय गुणधर्मि

श्रीभा० अ०
७

ण्तोस्मि परं पदं॥२६॥ योगरंधितकर्माणो हृदि योगविभाविते॥ योगिनो यं प्रपश्यं
ति योगेशं तं नतोस्म्यहं॥२७॥ नमो नमस्तुभ्यमशास्त्रवेगशक्तित्रयायाखिलधी
गुणाय॥ योगिनां यं प्रपश्यंति योगेशं तं नतोस्म्यहं॥२८॥ नमो नमस्तुभ्यमशन्न
प्रपन्नपालाय दुरंतशक्तये कदिंद्रियाणामनवाप्यवर्त्मने॥२८॥ नायं वेद स्वमा
त्मानं यच्छक्त्याऽहं धियाहतं॥ तं दुरत्ययमाहात्म्यं भगवंतमितोस्म्यहं॥२९॥ श्री
शुक उवाच॥ एवं गजेंद्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिंगभिदाभि
माना॥ नैते यदोपससृपुर्निखिलात्मकत्वा तत्राखिलामरमयो हरिराविरासी
त्॥३०॥ तं तद्वदार्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः॥
छंदोमयेन गरुडेन समुह्यमानः चक्रायुधोभ्यगमदाशु यतो गजेंद्रः॥३१॥ सोंतःसर
स्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रं॥ उत्क्षिप्य सांबुजकर
गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते॥३२॥ तं वीक्ष्य पीडितमजः सहसा

राम०
७

त्वापि देहमभयंकरो नु मे दभ्रदयो विमोक्षणं ॥१९॥ एकांतिनो यस्य न कंचनार्थं वां
छंति ये वै भगवत्प्रपन्नाः ॥ अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्रमग्नाः ॥
२०॥ तमक्षरं ब्रह्म परं परेशमव्यक्तमध्यात्मिकयोगगम्यं ॥ अतींद्रियं सूक्ष्ममिवा
तिदूरमनंतमाद्यं परिपूर्णमीडे ॥२१॥ यस्य ब्रह्मादयो दे[illegible]वेदा लोकाश्चराचराः ॥
नामरूपविभेदेन फल्ग्व्या च कलया कृता ॥२२॥ यथा[illegible]भस्तयो नि
र्यांति संयांत्यसकृत्स्वरोचिषः ॥ तथा यतोयं गुणसंप्रवा[illegible]द्धिर्मनः खानि शरी
रसर्गाः ॥२३॥ स वै न देवासुरमर्त्यतिर्यङ् ॥ न स्त्री न षंढो न पुमान् न जंतुः ॥ नायं गुणः
कर्म न सन्न चासन्निषेधशेषो जयतादशेषः ॥२४॥ जिजीविषे नाहमिहामुया कि
मंतर्वहिश्चावृतयेभयोन्या ॥ इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोकावरण
स्य मोक्षं ॥२५॥ सोहं विश्वसृजं विश्वमविश्वं विश्ववेदसं ॥ विश्वात्मानमजं ब्रह्मप्र

श्रीभा० अ० ८ भगवतोरूपंपीतवासाश्चतुर्भुजः॥६॥सवेपूर्वमभूद्राजापांड्योद्रविडसत्तमः॥इंद्र
द्युम्नइतिख्यातोविष्णुव्रतपरायणः॥७॥सएकदाराधनकालआत्मवान्गृहीत
मौनव्रतईश्वरंहरिं॥जटाधरस्तापसआप्लुतोच्युतंसमर्चयामासकुलाचला
श्रमः॥८॥यदृच्छयातत्रमहायशामुनिःसमागमच्छिष्यगणैःपरिश्रितः॥तंवीक्ष्य
तूष्णीमकृतार्हणादिकंरहस्युपासीनमृषिश्चुकोपह॥९॥तस्मादिमंशाप
मदादसाधुरयंदुरात्माऽकृतबुद्धिरद्य॥विप्रावमंताविशतांतमोंधं॥यथागजःस्त
ब्धमतिःसएवः॥१०॥श्रीशुकउवाच॥एवंशप्त्वागतोगस्त्योभगवान्नृपसानुगः॥इं
द्रद्युम्नोपिराजर्षिर्दिष्टंतदुपधारयन्॥११॥आपन्नःकौंजरींयोनिमात्मस्मृतिवि
नाशिनीं॥हर्यर्चनानुभावेनयद्गजत्वेप्यनुस्मृतिः॥१२॥एवंविमोक्ष्यगजयूथपम राम० ८
ब्जनाभस्तेनापिपार्षदगतिंगमितेनयुक्तः॥गंधर्वसिद्धविबुधैरुपगीयमानकर्मा

वतीर्य स ग्राहमाशु सरसः कृपयोज्जहार ॥ ग्राहाद्विपाटितमुखादरिणा गजेंद्रं
संपश्यतां हरिरमूमुचदुछ्रियाणां ॥३३॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कं
धे गजेंद्रमोक्षणं नाम तृतीयोऽध्याय ॥३॥ चतुर्थे तु ततो ग्राहः प्राप्य गंधर्वतां पु
नः ॥ गजं स्वपार्षदं कृत्वा हरिर्निन्ये निजं पदं ॥१॥ ॥ श्रीशुक उवाच ॥ तदा देवर्षि
गंधर्वा ब्रह्मेशानपुरोगमाः ॥ मुमुचुः कुसुमासारं शंसंतः कर्म तद्धरेः ॥१॥ नेदुर्दुं
दुभयो दिव्या गंधर्वा ननृतुर्जगुः ॥ ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमं ॥२॥
योऽसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक् ॥ मुक्तो देवलशापेन हूहूर्गंधर्वसत्तमः ॥
३॥ प्रणम्य शिरसाधीशमुत्तमश्लोकमव्ययं ॥ अगायत यशोधाम कीर्तन्यगुण
सत्कथं ॥४॥ सोऽनुकंपित ईशेन परिक्रम्य प्रणम्य तं ॥ लोकस्य पश्यतो लोकं स्वमा
गान्मुक्तकिल्बिषः ॥५॥ गजेंद्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबंधनात् ॥ प्राप्तो

श्रीभा०स्क० १९

रपि ॥२२॥ गंगा सरस्वती नंदा कालिंदी सितवारणं ॥ ध्रुवं ब्रह्मर्षीन्सप्त पुण्य
श्लोकांश्च मानवान् ॥२३॥ उत्थायापररात्रांते प्रयताः सुसमाहिताः ॥ स्मरंति मम रूपा
णि मुच्यंते ह्येनसोऽखिलात् ॥२४॥ ये मां स्तुवंत्यनेनांग प्रतिबुध्य निशात्ययं ॥ तेषां
प्राणात्यये चाहं ददामि विमलां मतिं ॥२५॥ श्रीशुक उवाच ॥ इत्यादिश्य हृषीकेशः
प्राध्माय जलजोत्तमं ॥ हर्षयन् विबुधानीकमारुरोह खगाधिपं ॥२६॥ इति श्रीम
द्भागवते महा० अष्टमस्कंधे चतुर्थोध्यायः ॥४॥ अम्रताख्यानम[illegible]भिरध्यायेरूप
वर्णितं ॥ स्वमन्वपत्न्यपातेन यत्र पोषयितं प्रभो ॥ पंचमे पंचमे चाथ षष्ठे चाकथ
यन्मनुं ॥ विप्रशापाच्च्युतिः श्रीकेः कृतां देवैः हरिस्तुतिं ॥१॥ ॥श्रीशुक उवाच॥
राजन्नुदितमेतत्ते हरेः कर्माघनाशनं ॥ गजेंद्रमोक्षणं पुण्यं रैवतं त्वंतरं शृणुः
॥ पंचमो रैवतो नाम मनुस्तामससोदरः ॥ बलिविंध्यादयस्तस्य सुता अर्जुनपूर्व
काः ॥२॥ विभुरिंद्रः सुरगणा राजन्भूतरयादयः ॥ हिरण्यरोमा वेदशिरा ऊर्द्धवा

राम १९

द्धृतं स्वभुवनं गरु आसनो गातू ॥ १३ ॥ ततन्महाराजस्तवैरितो मया कृष्णानुभावो गजेराज मोक्षणं ॥ स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य श्रृएवतां ॥ १४ ॥ यथानुकीर्त्तयंत्येतच्छ्रेयस्कामाद्विजातयः ॥ शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशांतये ॥ १५ ॥ इदमाह हरिः प्रीतो गजेंद्रं कुरुसत्तम ॥ श्रृएवतां सर्वभूतानां सर्वभूतमयो विभुः ॥ १६ ॥ श्रीभगवानुवाच ॥ ये मां त्वां च सरश्चेदं गिरिकंदरकाननं ॥ वेत्रकीचकवेएएनां गुल्मानि सुरपादपान् ॥ १७ ॥ श्रृंगाएिमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च ॥ क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरं ॥ १८ ॥ श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम ॥ सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरं ॥ १९ ॥ शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयां ॥ ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च ॥ २० ॥ मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे ॥ कर्माएयनंतपुएयानि सूर्यं सोमं हुताशनं ॥ २१ ॥ प्रणवं सत्यमव्यक्तं गोविप्रान्धर्ममव्ययं ॥ दाक्षायणीर्धर्मपत्नीः सोमकश्यपयो

त्वयासंकथ्यमानेनमहिम्नासात्वतांपते॥ नातितृप्यतिमेचित्तंसुचिरंतापता
श्रीभा० अ० पितं॥१२॥ श्रीशुकोवाच॥ यदायुद्धेऽसुरैर्देवा बाध्यमानासितायुधैः॥ गतासवाः
१० निःपतितानोत्तिष्टेरंस्मभूयसः॥१५॥ यदादुर्वाससःशापेसेंद्रालोकास्त्रयोनृ
प॥ निःश्रीकाश्चाभवंस्तत्रनेशुरिज्यादयःक्रियाः॥१६॥ निशम्यैतत्सुरग
णामहेंद्रवरुणादयः॥ नाध्यगछन्स्वयंमंत्रैर्मंत्रयंतोविनिर्णयं॥१७॥ ततो
ब्रह्मसभांजग्मुर्मेरोर्मूर्द्धनिसर्वशः॥ सर्वंविज्ञापयांचक्रुःप्रणताःपरमेष्टि
नं॥१८॥ संविलोक्यंवासवादीन्निःसत्वान्विगतप्रभान्॥ लोकानमंगल
प्रायानसुरानयथाप्रभुः॥१९॥ समाहितेनमनसासंस्मरन्पुरुषंपरं॥ उवा
चोत्फुल्लवदनोदेवान्सभगवान्परः॥२०॥ ब्रह्मोवाच॥ अहंभवोयूयमथो
ऽसुरादयो॥ मनुष्यतिर्यग्द्रुमधर्मजातयः॥ यस्यावतारांशकलाविसर्जि
ता॥ व्रजामसर्वेशरणंतमव्ययं॥२१॥ नयस्यवध्योनचरक्षणीयो नोपेक्षणी

राम
१०

द्वादयो भुजाः ॥३॥ पत्नी विकुंठा शुभ्रस्य वैकुंठैः सुरसत्तमैः ॥ तयोः स्वकलया यज्ञे
वैकुंठो भगवान्स्वयं ॥४॥ वैकुंठः कल्पितः स्वेन लोको लोकनमस्कृतः ॥ रमया प्रा
प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ॥५॥ तस्यानुभावः कथितो गुणाश्च परमो
दयाः ॥ भूमिरेणून्स विममे यो विष्णोर्वर्णयेद्गुणान् ॥६॥ षष्ठश्च चाक्षुषः पु
त्रश्चाक्षुषो नाम वै मनुः ॥ पूरुपूरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ॥७॥ इं
द्रो मंत्रद्रुमस्तत्र देवा आप्यादयो गणाः ॥ मुनयस्तत्र वै राजन् हविष्मद्वीर
कादयः ॥८॥ तत्रापि देवः संभूत्यां वैराजस्याऽभवत्सुतः ॥ अजितो नाम भग
वानंशेन जगतः पतिः ॥९॥ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा ॥ भ्र
ममाणोंऽभसि धृतः कूर्मरूपेण मंदरः ॥१०॥ राजोवाच ॥ यथा भगवता ब्रह्मन्
मथितः क्षीरसागरः ॥ यदर्थं वा यतश्चाद्रिं दधारांबुचरात्मना ॥११॥ यथा
मृतं सुरैः प्राप्तं किमन्यदभवत्ततः ॥ एतद्भगवतः कर्म वदस्व परमाद्भुतं ॥१२॥

श्रीभा० अ० निर्जितात्मात्मगुणंपरेशंनमामभूतेषुसमंचरंतं॥३०॥इमेवयंयत्प्रिययैवतन्वा
१२ सत्वेनसृष्टावहिरंतराविः॥गतिंनसूक्ष्मामृषयश्चविद्महेकुतोऽसुराद्याइतर
प्रधानाः॥३१॥पादौमहीयंस्वकृतैवयस्यचतुर्विधोयत्रहिभूतसर्गः॥सवैमहापु
रुषआत्मतंत्रःप्रसीदतांब्रह्ममहाविभूतिः॥३२॥अंभस्तुयद्रेतउदारवीर्यंसिद्ध्यं
तिजीवंत्युतवर्द्धमानाः॥लोकास्त्रयोथाऽखिललोकपालाःप्रसीदतांब्रह्ममहावि
भूतिः॥३३॥सोमंमनोयस्यसमामनंतिदिवौकसांवैवलमंधआयुः॥ईशोनगा
नांप्रजनःप्रजानांप्रसीदतांनःसमहाविभूतिः॥३४॥अग्निर्मुखंयस्यतुजातवेदा
जातःक्रियाकांडनिमित्तजन्मा॥अंतःसमुद्रेऽनुपचन्स्वधातून्प्रसीदतांनः
समहाविभूतिः॥३५॥यच्चक्षुरासीत्तरणिर्देवयानंत्रयीमयोब्रह्मणएषधिष्ण्यं॥ राम०
द्वारंचमुक्तेरमृतंचमृत्युःप्रसीदतांनःसमहाविभूतिः॥३६॥प्राणाद्भूद्यस १२
चराचराणांप्राणःसहोबलमोजश्चवायुः॥अन्वास्मसंम्राजमिवानुगावयंप्रसी

याद्द्रणीयपत्त्नः॥ अथापिसर्गस्थितिसंयमार्थंसवैरजःसत्वतमांसिकाले॥२२॥अयंतु
तस्यस्थितिपालनंक्षणः सत्वंजुषाणस्यभवोयदेहिनां॥तस्माद्व्रजामःशरणंयम
दुह्यमानांश्शनोधास्यतिशंसुरप्रियः॥२३॥इत्याभाष्यसुरान्वेधासहदेवैररिंदमः॥
अजितस्यपदंसाक्षाज्जगामतमसःपरं॥२४॥तत्रादृष्टस्वरूपायश्रुतपूर्वायवैप्रभो॥स्तु
तिमब्रूमदेवीभिर्वाग्भिस्त्ववहितेंद्रियः॥२५॥ब्रह्मोवाच॥अविक्रियंसत्यमनंतमाद्यंगुहा
शयंनिष्कलमप्रतर्क्यं॥मनोग्रयानंवचसानिरुक्तं नमामहेदेववरंवरेण्यं॥२६॥वि
पश्चितंप्राणमनोधियात्मनामर्थेंद्रियाभासमनिद्रमव्रणं॥छायातपौयत्रनगृध्र
पक्षौतमक्षरंखंत्रियुगंनमामहे॥२७॥अजस्यचक्रंत्वजयेर्यमाणंमनोमयंपंचद
शारमाशु॥त्रिणाभिविद्युच्चलमष्टनेमियदक्षमाहुस्तमृतंप्रपद्ये॥२८॥यएकव
र्णंतमसःपरंतद्लोकमव्यक्तमनंतपारं॥आसांचकारोपसुपर्णमेनमुपासतेयो
गरथेनधीराः॥२९॥नयस्यकश्चातितितर्त्तिमायांययाजनोमुह्यतिवेदनार्थं॥तं

श्रीभा० अ०
१२

धायुवाधं प्रसीदतां नः स महाविभूतिः ॥४३॥ नमोस्तु तस्मै उपशांतशक्तये स्वाराज्य
लाभप्रतिपूरितात्मने ॥ गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नभस्वदूत
ये ॥४४॥ स त्वं नो दर्शयात्मानमस्मत्करणगोचरं ॥ प्रपन्नानां दिदृक्षूणां स
स्मितं ते मुखांबुजं ॥४५॥ तैस्तैः स्वेच्छाभूतै रूपैः काले काले स्वयं विभो ॥ कर्म दु
र्विषहं यन्नो भगवांस्तत्करोति हि ॥४६॥ क्लेशभूर्यल्पसाराणि विफलानि च ॥
देहिनां विषयार्त्तानां न तथैवार्पितं त्वयि ॥४७॥ नावमः कर्मकल्पोपि विफला
येश्वरार्पितः ॥ कल्पते पुरुषस्यैव स ह्यात्मा दयितो हितः ॥४८॥ यथा हि स्कंधशाखा
नां तरोर्मूलावसेचनं ॥ एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥४९॥ नमस्ते
स्त्वनंताय दुर्वितर्क्यात्मकर्मणे ॥ निर्गुणाय गुणेशाय सत्वस्थाय च सांप्र
तं ॥५०॥ इति श्रीभागवते महा० अष्ट० स्कं० अमृतमथनारंभो नाम पंचमोध्यायः ॥५॥

दतांनःसमहाविभूतिः॥३७॥श्रोत्राद्दिशो यस्य हृदश्च खानि प्रजज्ञिरे खंपु
रुषस्य नाभ्याः॥प्राणेंद्रियात्मासुशरीरकेतः प्रसीदतांनःसमहाविभूतिः॥
३८॥बलान्महेंद्रः त्रिदशाः प्रसादान्मन्योर्गिरीशो धिषणाद्विरंच्यः॥खेभ्य
श्च छंदांस्यृषयो मेढ्रतः कः प्रसीदतांनःसमहाविभूतिः॥३९॥श्रीर्वक्ष
सःपितरःछायया सन् धर्मः स्तनादितरः पृष्ठतोभूत्॥द्यौर्यस्य शीर्ष्णो
ऽप्सरसो विहारात्प्रसीदतांनःसमहाविभूतिः॥४०॥विप्रो मुखं ब्रह्म च यस्य
गुह्यं राजन्य आसीद्भुजयोर्बलंच॥ऊर्वोर्विडोजोंघ्रिरवेदशूद्रौ प्रसीदतांनः
समहाविभूतिः॥४१॥लोभोऽधरात्प्रीतिरुपर्यभूत् द्युतिर्नस्तः पशव्यः स्पर्शे
नकामः॥भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रसीदतांनःसमहाविभूतिः॥४२॥
द्रव्यंवयः कर्मगुणान्विशेषं यद्योगमायाविहितान्वदंति॥यद्दुर्विभाव्यंप्रबु

श्रीभा०अ०
२३

वनिंगतै ॥७॥ ब्रह्मोवाच ॥ अजातजन्मस्थितिसंयमायगुणायनिर्वाणसुखार्णवा
य ॥ अणोरणिम्नेपरिगण्यधाम्नेमहानुभावायनमोनमस्ते ॥८॥ रूपंतवैतत्पुरु
षर्षभेज्यंश्रेयोर्थिभिर्वैदिकतांत्रिकेण ॥ योगेनधातःसहनस्त्रिलोकान्पश्याम्यमु
ष्मिन्नुहविश्वमूर्ते ॥९॥ त्वय्यग्रआसीत्वयिमध्यआसीत्त्वय्यंतआसीदिदमा
त्मतंत्रे ॥ त्वमादिरंतोजगतोस्यमध्यंघटस्यमृत्स्नेवपरापरस्मात् ॥१०॥ त्वंमा
यःयात्माश्रयासयेदंनिर्मायविश्वंतदनुप्रविष्टः ॥ पश्यंतियुक्तामनसा
मनीषिणोगुणव्यवायेप्यगुणंविपश्चितः ॥११॥ यथाग्निमेधस्यमृतंचगोषु
भुव्यन्नमंबूद्यमनेचवृत्तिं ॥ योगैर्मनुष्याअधियंतिहित्वांगुणेषुबुद्ध्याकवयो
वदंति ॥१२॥ तंत्वांवयंनाथसमुज्जिहानंसरोजनाभातिचिरेप्सितार्थं ॥ दृष्ट्वा
गतानिर्वृतिमद्यसर्वेगजादवार्त्ताइवगांगमंभः ॥१३॥ सत्वंविधत्स्वाखिललोक राम०
पालावयंयदर्थास्तवपादमूलं ॥ समागतास्तेवहिरंतरात्मन्किंचान्यविज्ञाप्य २३

षट्पुनस्तातिर्विघ्नोवाविभ्नृतेसुरैः हृताः॥तन्मंत्राच्चासुरैः शाक मम्य त..र्ज्जि महोध
म:सहस्त्रार्कानामुदयेद्युतिर्यस्य॥११॥ ॥श्रीशुकउवाच॥एवंस्तुतः सुरग
णैः भगवान्हरिरीश्वरः॥तेषामाविरभू[illegible]जन्सहस्त्रार्कोदयद्युतिः॥१॥
तेनैवसहसासर्वे देवाःप्रतिहतेक्षणाः॥नोपस्पन्खं दिशाः क्षोणीमात्मानंच
कुतोविभुं॥विरिंच्योभगवान्दृष्ट्वासहसर्वेणतांतनुं॥स्वच्छांमरकतश्यामांकं
जगर्भारुणेक्षणां॥३॥तप्तहेमावदानेनलसत्कौशेयवाससा॥प्रसन्नचारु
सर्वांगीसुमुखींसुंदरभ्रुवं॥४॥महामणिकिरीटेनकेयूराभ्यांचभूषितां॥कर्णा
भरणनिर्भातकपोलश्रीमुखांबुजां॥५॥कांचीकलापवलयहारनूपुरशोभितां॥
कौस्तुभाभरणांलक्ष्मींबिभ्रतींवनमालिनीं॥६॥सुदर्शनादिभिःस्वास्त्रैर्मूर्त्तिमद्भि
रुपासितांतुष्टावदेवप्रवरःसर्वशःपुरुषंपरं॥७॥सर्वामरगणैःशाकंसर्वांगैर

तेषामंतर्दधे राजंस्वच्छंदगतिरीश्वरः ॥२६॥ अथ तस्मै भगवते नमस्कृत्य पितामहः ॥ भवश्च जग्मतुः स्वं स्वं
७ धामोपेयुर्बलिं सुराः ॥२७॥ दृष्ट्वारीनप्यसंयत्तान् जातक्षोभान्स्वनायकान् ॥ न्यषेधद्दैत्यराट् श्लोक्यः संधिविग्रहकालवित् ॥२८॥
श्रीभा० ८० क्रियातामविलंबितं ॥ यस्य पीतस्य वै जंतुर्मृत्युग्रस्तोऽमरो भवेत् ॥२९॥ क्षिप्त्वा क्षी
१४ रोदधौ सर्वा वीरुत्तृणलतौषधीः ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिं ॥२२॥
सहायेन मया देवा निर्मथध्वमतंद्रिताः ॥ क्लेशभाजो भविष्यंति दैत्या यूयं फलग्रहा ॥
२३॥ यूयं तदनुमोदध्वं यदिच्छंत्यसुरा सुराः ॥ न संरंभेण सिध्यंति सर्वेऽर्थाः सांत्वया
यथा ॥२४॥ न भेतव्यं कालकूटाद्विषाज्जलधिसंभवात् ॥ लोभः कार्यो न वो जातु रो
षः कामस्तु वस्तुषु ॥२५॥ श्रीशुक उवाच ॥ इति देवान्समादिश्य भगवान्पुरुषो
त्तमः ॥ ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः ॥ श्रिया परमया जुष्टं जिताशेषमुपाग
मन् ॥२९॥ महेंद्रः श्लक्ष्णया वाचा सांत्वयित्वा महामतिः ॥ अभ्यभाषत तत्सर्वं शिक्षि
तं पुरुषोत्तमात् ॥३०॥ तदरोचत दैत्यस्य तत्रान्ये येऽसुराधिपाः ॥ शंबरोऽरिष्टने
मिश्च ये च त्रिपुरवासिनः ॥३१॥ ततो देवासुराः कृत्वा संविदं कृतसौहृदाः ॥ उद्यम राम०
१४

मशेषसात्विराणाः ॥२४॥ अहं गिरीशश्च सुरादयो ये दक्षादयो ग्नेरिव केतवस्ते ॥ किं
वा विदामेश पृथग्विभाता विधत्स्व शं नो द्विजदेवमंत्रं ॥२५॥ श्रीशुक उवाच ॥ ए
वं विरिंच्यादिभिरीडितस्तद्विज्ञाय तेषां हृदयं यथैव जगाद जीमूतगंभीरया
गिरा बद्धांजलीन् संवृतसर्वकारकान् ॥२६॥ एक एवेश्वरस्तस्मिन्सुरकार्ये
सुरेश्वरः ॥ विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः ॥२७॥ श्रीभगवानु
वाच ॥ हंत ब्रह्मन्नहो शंभो हे देवा मम भाषितं ॥ शृणुतावहिताः सर्वे श्रेयो
वः स्याद्यथा सुराः ॥२८॥ यात दानवदैतेयैस्तावत्संधिर्विधीयतां ॥ कालेना
नुगृहीतैस्तै यावद्वो भव आत्मनः ॥२९॥ अरयोपि हि संधेयाः सति कार्यार्थ
गौरवे ॥ अहिमूषकवद्देवा ह्यर्थस्य पदवीं गतैः ॥२०॥ अमृतोत्पादने यत्नः

श्रीभा०स्कं० जनैः॥ कृतःसन्‌कूपःयारुद्रःपयोविषमितीर्यते॥ ॥शुकउवाच॥तेनागराजमामं
त्रफलभागेनवासुकिं॥परिवीयगिरौतस्मिन्नेत्रमब्धिंमुदान्विताः॥आरेभिरेसुरा
२५ यत्ताअमृतार्थेकुरूद्वह॥१॥हरिःपुरस्ताज्जगृहेपूर्वंदेवास्ततोभवन्॥त
न्नैछंदैत्यपतयोमहापुरुषचेष्टितं॥२॥नगृह्णीमोवयंपुछमहेरंगममंगलं॥
स्वाध्यायश्रुतसंपन्नाःप्रख्याताःजन्मकर्मभिः॥३॥इतितूष्णींस्थितान्दैत्यान्वि
लोक्यपुरुषोत्तमः॥स्मयमानोविसृज्याग्रंपुछंजग्राहसामरः॥४॥कृतस्थान
विभागास्तेएवंकश्यपनंदनाः॥ममंथुःपरमायत्ताअमृतार्थंपयोनिधिं॥५॥
मथ्यमानेर्णवेसोद्रिरनाधारोत्वपोविशत्॥ध्रियमाणोपिबलिभिर्गौरवात्पां
डुनंदन॥६॥तंसुनिर्विण्णमनसःपरिम्लानमुखश्रियः॥आसन्स्वपौरुषेनष्टेदै
वेनातिबलीयसा॥७॥विलोक्यविघ्नेशविधिंतदेश्वरोदुरंतवीर्योऽवितथाऽभि राम०
संधिः॥कृत्वावपुःकाछपमद्भुतंमहत्प्रविश्यतोयंगिरिमुज्जहार॥८॥तमुत्थि २५

परमं चक्रुरमृतार्थे परं तपः ॥ ३२ ॥ ततस्ते मंदरगिरिमोजसोत्पाट्य दुर्मदा ॥ नदंतउ
दधिं निन्युः शक्ता परिघबाहवः ॥ ३३ ॥ दूरभारोद्वहश्रांताः शक्रवैरोचनाद
यः ॥ अपारयंतस्तं वोढुं विवशा विजहुः पथि ॥ ३४ ॥ निपतन्स गिरिस्तत्र बहूनम
रदानवान् ॥ चूर्णयामास महता भारेण कनकाचलः ॥ ३५ ॥ तांस्तथा भग्नमनसो
भग्नबाहूरुकंधरान् ॥ विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ॥ ३६ ॥ गिरिपातविनिः
पिष्टान्विलोक्यामरदानवान् ॥ ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा ॥
३७ ॥ गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया ॥ आरुह्य प्रययावब्धिं सुरासुरग
णैर्वृतः ॥ ३८ ॥ अवरोप्य गिरिं स्कंधात्सुपर्णः पततां वरः ॥ ययौ जलांत उत्सृज्य
हरिणा स विसर्जितः ॥ ३९ ॥ इति श्रीमद्भागवते महापुराणे अष्टस्कंधेऽमृत
मंथने मंदराचलनयने षष्ठोध्यायः ॥ ६ ॥ सप्तममथनाद्भूतविषभीत्याऽखिले

श्री भा० स्कं० ८ ६६

माना त्तदा सिंधो र्दैवासुरा वरूथ पैः ॥ यदा सुधा न जायेत निर्ममंथाजितः स्वयं ॥ १६ ॥
मेघ श्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्ध्नि भ्राजद्विलुलितकचैः स्रग्धरो र
क्तनेत्रः ॥ जैत्रै र्दोर्भि र्जगदभयदै र्दंदशूकं गृहीत्वा ॥ मंथन्मथ्ना प्रतिगिरि वरश्शो
भतार्थोध्धृताद्रिः ॥ १७ ॥ निर्मथ्यमानादुदधेरभूद्विषं ॥ महोल्वणं हालहलाह्वम
ग्रतः ॥ संभ्रांतमीनोन्मकराहिकच्छपात्तिमिद्विपग्राहतिमिंगलाकुलात् ॥ १८ ॥ त
दुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पमसह्यमप्रति ॥ भीताः प्रजादुद्रुवरंग
सेसुरा अरक्ष्यमाणाः शरणं सदाशिवं ॥ १९ ॥ विलोक्यतं देववरं त्रिलोक्या भ
वाय देव्याभिमतं मुनीनां ॥ आसीनमद्रावपवर्गहेतो स्तपो जुषाणं स्तुतिभिः प्र ८ म०
णेमुः ॥ २० ॥ प्रजापतय ऊचुः ॥ देवदेव महादेव भूतात्मन्भूतभावन ॥ त्राहिनः शर ६६
णापन्नांस्त्रैलोक्यदहनाद्विषात् ॥ २१ ॥ त्वमेकः सर्वजगत ईश्वरो बंधमोक्षयोः ॥ तंत्वा

तंवीक्ष्यकुलाचलंपुनः॥समुत्थितानिर्मथितंसुरासुराः॥दधारपृष्टेनसलक्षयोज
नं॥प्रस्तारिणाद्वीपइवापरोमहान्॥९॥सुरासुरेंद्रैर्भुजवीर्यवेपितंपरिभ्रमंतं
गिरिमंगपृष्टतः॥बिभ्रत्तदावर्त्तनमादिकच्छपोमेनेंगकंडूयनमप्रमेयः॥१०॥तथा
सुरानाविशदासुरेणरूपेणतेषांबलवीर्यमीरयन्॥उद्दीपयन्देवगणांश्च
विष्णुर्दैवेननागेंद्रमबोधरूपः॥११॥उपर्यगेंद्रंगिरिराडिवान्यआक्रम्यहस्तेनस
हस्रबाहुः॥तस्थौदिविब्रह्मभवेंद्रमुख्यैरभीष्टुवद्भिःसुमनोभिवृष्टः॥१२॥उप
र्यधश्चात्मनिगोत्रनेत्रयोःपरेणतेप्राविशतासमेधिताः॥ममंथुरब्धिंतरसामदो
त्कटामहाद्रिणाक्षोभितनक्रचक्रं॥१३॥अहींद्रसाहस्रकठोरदृङ्मुखश्वासाग्निप्र
धूमाहतवर्चसोसुराः॥पौलोमकालेयबलील्वलादयोदवाग्निदग्धाःसर
लाइवाभवन्॥१४॥देवांश्चतच्छ्वासशिखाहतप्रभान्धूम्राम्बरस्रग्वरकंचुका
ननान्॥समभ्यवर्षन्भगवद्वशाघनाववुःसमुद्रोर्म्युपगूढवायवः॥१५॥मथ्य

श्रीभा० स्कं०
८७

वाच्यं परमार्थतत्त्वं देवस्वयंज्योतिरवस्थितिस्ते ॥२९॥ छायात्वधर्मोर्मिषु
यैर्विसर्गो नेत्रत्रयं सत्वरजस्तमांसि ॥ सांख्यात्मनः शास्त्रकृतस्तवेक्षा
छंदोमयो देव ऋषिः पुराणः ॥३०॥ न ते गिरित्राखिललोकपालवि
रंचिवैकुंठसुरेंद्रगम्यं ॥ ज्योतिः परं यत्र रजस्तमश्च सत्वं न यद्ब्रह्मनिर
स्तभेदं ॥३१॥ कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तु
तये न तत्ते ॥ यस्त्वंतकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिंगशिखया
भसितं न वेद ॥३२॥ ये त्वात्मरामगुरुभिर्हृदि चिंतितांघ्रिद्वंद्वं चरंतमुम
या तपसाभितप्तं ॥ कत्थंत उग्रपरुषं निरतं श्मशाने ते नूनमूतिमविदंस्त
वहातलज्जाः ॥३३॥ तत्तस्य ते सदसतोः परतः परस्य नांजः स्वरूपगमने प्रभ राम०
वंति भूम्न ॥ ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्गसर्गविषया अपि शक्ति ८७

मर्चंति कुशलाः प्रपन्नार्त्तिहरं गुरुं ॥२२॥ गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान्वि
भो ॥ धत्से यदा स्वदृग्भूमन् ब्रह्मविष्णुशिवाभिधां ॥२३॥ त्वं ब्रह्म परमं गुह्यं सद
सद्भावभावनः ॥ नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः ॥२४॥ त्वं शब्दयोनि
र्जगदादिरात्मा प्राणेंद्रियद्रव्यगुणः स्वभावः ॥ कालः क्रतुः सत्यमृतं च धर्मस्त्व
य्यक्षरं यत्त्रिवृदामनंति ॥२५॥ अग्निर्मुखं तेखिलदेवतात्मा क्षितिं विदुर्लोकभ
वांघ्रिपंकजं ॥ कालं गतिं तेखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशं ॥२६॥
नाभिर्नभस्ते श्वसनं नभस्वान् सूर्यश्च चक्षूंषि जलं स्म रेतः ॥ परावरात्माश्रयणं
तवात्मा सोमो मनो द्यौर्भगवन् शिरस्ते ॥२७॥ कुक्षिः समुद्रा गिरयोस्थिसंघा रोमा
णि सर्वौषधिवीरुधस्ते ॥ छंदांसि साक्षात्तव सप्तधातवस्त्रयीमयात्मन् हृदयं स
र्वधर्मः ॥२८॥ मुखानि पंचोपनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमंत्रवर्गः ॥ यत्तच्छि

श्रीभा० अ० तस्यापिदर्शयामासस्ववीर्यंजलकल्मषः॥यच्चकारगलेनीलंतच्चसाधोर्विभूषणं॥
४३॥तप्यंतेलोकतापेनसाधवःप्रायशोजनाः॥परमाराधनंतद्धिपुरुषस्याखिलात्म
१८ नः॥४४॥निशम्यकर्मतच्छंभोर्देवदेवस्यमीढुषः॥प्रजादाक्षायणीब्रह्मावैकुंठश्च
शशंसिरे॥४५॥प्रस्कन्नंपिबतःपाणेर्यत्किंचिज्जगृहुःस्मतत्॥वृश्चिकाहिविषौष
ध्योदंदशूकाश्चयेपरे॥४६॥इतिश्रीमद्भागवतेमहापुराणेपारमहंस्यांसंहितायांअ
ष्टमस्कंधेसप्तमोध्यायः॥७॥अष्टमेमथ्यमानेऽब्धौलक्ष्मीर्विष्णोर्हृतेसुरः॥धन्वंत
रिःऽमृतेसोमेमोहिन्युद्भवईर्यते॥१॥ ॥श्रीशुकउवाच॥पीतेगरेवृषांकेणप्री
तास्तेऽमरदानवाः॥ममंथुस्तरसासिंधुंहविर्धानीततोऽभवत्॥१॥तामग्निहोत्रीमृषयो
जगृहुर्ब्रह्मवादिनः॥यज्ञस्यदेवयानस्यमेध्यायहविषेनृप॥२॥ततःउच्चैःश्रवानाना
महयोभूच्चंद्रपांडुरः॥तस्मिन्बलिःस्पृहांचक्रेनेंद्रईश्वरशिक्षया॥३॥ततोऐ राम०
रावतोनामवारणेंद्रोविनिर्गतः॥दंतैश्चतुर्भिश्वेताद्रेर्हरन्भगवतोमहिं॥४॥ते १८

मात्रं ॥३४॥ एतत्परं प्रपश्यामो न परं ते महेश्वर ॥ मृडनाय हि लोकस्य व्यक्तिस्तेऽव्य
क्तकर्मणः ॥३५॥ श्रीशुक उवाच ॥ तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः ॥ सर्व
भूतसुहृद्देव इदमाह सतीं प्रियां ॥३६॥ शिव उवाच ॥ अहो वत भवान्येतत्प्रजा
नां पश्य वैशसं ॥ क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितं ॥३७॥ आसां प्रा
णपरीप्सूनां विधेयमभयं हि मे ॥ एतावान्हि प्रभोरर्थो यद्दीनपरिपालयनं ॥
३८॥ प्राणैः स्वैः प्राणिनः पान्ति साधवः क्षणभंगुरैः ॥ बद्धवैरेषु भूतेषु मोहितेष्वा
त्ममायया ॥३९॥ पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः प्रीते हरौ भगवति प्रि
येऽहं सचराचरः ॥४०॥ तस्मादिदं गरं भुंजे प्रजानां स्वस्तिरस्तु मे ॥ एवमामंत्र्य भग
वान्भवानीं विश्वभावनः ॥ तद्विषं जग्धुमारेभे प्रभावज्ञान्वमोदत ॥४१॥ ततः क
रतलीकृत्य व्यापि हालाहलं विषं ॥ अभक्षयन्महादेवः कृपया भूतभावनः ॥४२॥

श्रीभा०अ० शेयवाससीसमुपाहरन्॥ वरुणःस्रजंवैजयंतीमधुनामत्तषट्पदां॥१५॥भूषणानिवि
१८ चित्राणिविश्वकर्माप्रजापतिः॥हारंसरस्वतीपद्ममजोनागाश्चकुंडले॥१६॥ततःकृ
तस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफांपरिगृह्यपाणिना॥चचालवक्त्रंसुकपोलकुं
डलंसव्रीडहासंदधतीसुशोभनं॥१७॥स्तनद्वयंचातिकृशोदरीसमंनिरंतरंचंदन
कुंकुमोक्षितं॥ततस्ततोनूपुरवल्गुसिंजितैःविसर्पतीहेमलतेवसाबभौ॥१८॥वि
लोकयंतीनिरवद्यमात्मनःपदंध्रुवंचाव्यभिचारिसद्गुणं॥गंधर्वयक्षासुरसिद्ध
चारणत्रैविष्टपेयादिषुदोषसद्भवान्॥१९॥नूनंतपोयस्यनमन्युनिर्जयोज्ञा
नंक्वचित्तत्रनसंगवर्जितं॥कश्चिन्महांस्तस्यनकामनिर्जयःसईश्वरःकिंपरतोव्यपा राम०
श्रयः॥२०॥धर्मःक्वचित्तत्रनभूतसौहृदंत्यागःक्वचित्तत्रनमुक्तिकारणं॥वीर्यंनपुंसो १८
स्त्यजवेगनिहृतं नहिद्वितीयोगुणसंगवर्जितः॥२१॥क्वचिच्चिरायुर्नहिशीलमंग

तोभवत्पारिजातःसुरलोकविभूषणं॥पूरयंत्यर्थिनोयोर्थैःशश्वद्भुवियथाभवान्॥
६॥ततश्चाप्सरसोजाता निष्ककंठ्यःसुवाससः॥रमण्यःस्वर्गिणांवल्गुगतिलीलावलोकनैः॥
७॥ततश्चाविरभूत्साक्षाछ्रीरमाभगवत्परा॥रंजयंतीदिशःकांत्याविद्युत्सौदामि
नीयथा॥८॥तस्यांचक्रुःस्पृहांसर्वेससुरासुरमानवा॥रूपौदार्यवयोवर्णमहि
माक्षिप्तचेतसः॥९॥तस्याआसनमानिन्येमहेंद्रोमहदद्भुतः॥मूर्तिमत्यःसरि
त्स्रेष्टाहेमकुंभैर्जलंशुचि॥१०॥आभिषेचनिकाभूमिराहरत्सकलौषधी॥गावः
पंचपवित्राणिवसंतोमधुमाधवौ॥११॥ऋषयःकल्पयांचक्रुरभिषेकंयथाविधिः॥
जगुर्भद्राणिगंधर्वानट्यश्चननृतुर्जगुः॥१२॥मेघामृदंगपणवमुरजानकगोमु
खान्॥व्यनादयंशंखवेणुवीणास्तुमुलनिःस्वनान्॥१३॥ततोभिषिषिचुर्देवींश्रि
यंपद्मकरांसतीं॥दिगिभाःपूर्णकलशैःसूक्तवाक्यैर्द्विजेरितैः॥१४॥समुद्रःपीतको

श्रीभा० अ०
२४

सख्यावबभूवुरीस दानवा ॥२९॥ अथासीद्वारुणीदेवीकन्याकमललोचना ॥ असु
राजगृहुस्तांवैहरेरनुमतेनते ॥३०॥ अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः ॥
उदतिष्ठन्महाराजपुरुषःपरमाद्भुतः ॥३१॥ दीर्घपीवरदोर्दंडःकंबुग्रीवोरुणे
क्षणः ॥ श्यामलस्तरुणःस्रग्वीसर्वाभरणभूषितः ॥३२॥ पीतवासामहोरस्कःसुमृ
ष्टमणिकुंडलः ॥ स्निग्धकुंचितकेशांतःसुभगःसिंहविक्रमः ॥३३॥ अमृतापूर्ण
कलशंबिभ्रद्वलयभूषितः ॥ सवैभगवतःसाक्षाद्विष्णोरंशांशसंभवः ॥३४॥ ध
न्वंतरिरितिख्यात आयुर्वेददृगिज्यभाक् ॥३४॥ तमालोक्यासुराःसर्वेकलशं
चामृताभृतं ॥ लिप्संतःसर्ववस्तूनिकलशंतरसाहरन् ॥३५॥ नीयमानेऽसुरैस्त
स्मिन्कलशेऽमृतभाजने ॥ विषण्णमनसोदेवाहरिंशरणमाययुः ॥३६॥ इतित राम०
दैन्यमालोक्यभगवान्भृत्यकामकृत् ॥ माखिद्यतमिथोऽर्थंवःसाधयिष्येस्वमाय २०

लं॥क्व चित्तद्रूपास्ति न वै घमायुषः॥यत्रोभयं कुत्र च सोप्यमंगलः॥सुमंगलः कश्चन कां
क्षते हि मां॥२२॥एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतं गुणाश्रयं॥
वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुंदं निरपेक्षमीप्सितं॥२३॥तस्यांशदेश उश
तीं नवकंजमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टां॥तस्थौ निधाय निकटे तदु
रः स्वधाम सव्रीडहासविकसन्नयनेन याता॥२४॥तस्याः श्रियस्त्रिजगतो जन
को जनन्या वक्षो निवासमकरोत्परमं विभूतेः॥श्रीः स्वप्रजाः सकरुणेन निरीक्षणे
न यत्र स्थितैधयत साधिपतीं स्त्रिलोकान्॥२५॥शंखतूर्यमृदंगानां वादित्राणां
पृथक्स्वनः॥देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत्॥२६॥ब्रह्मरुद्रांगि
रोमुख्याः सर्वे विश्वसृजो विभुं॥ईडिरेऽवितथैर्मंत्रैः स्तल्लिंगैः पुष्पवर्षिणः॥२७॥
श्रियावलोकिता देवाः सप्रजापतयः प्रजाः शीलादिगुणसंपन्ना लेभिरे
निर्वृतिं परां॥२८॥निःसत्वा लोलुपा राजन्निरुद्योगा गतत्रपाः॥यदा चावेक्षिता

श्रीभा० अ०
२२

कामसुद्धीपयन्मुहुः॥४६॥इतिश्रीमद्भागवतेमहापुराणेअष्टमस्कंधेअष्टमोध्या
य॥८॥नवमेमोहिनीतैः दैसै अर्पिते ऽमृतभाजने तद्वंचनोः न देवेभ्यो ऽमृतं दत्तं त्विये
र्यंते॥१॥ ॥श्रुक उवाच॥ तेन्योन्यतो ऽसुराः पात्रं हरंतस्त्यक्तसौहृदाः॥क्षिपंतोद
सुधर्माणः आयांतीं ददृशुः स्त्रियं॥१॥अहोरूपमहोधाम अहो अस्यानववयः
॥इतितेतामभिद्रूत्यपप्रछुर्जातहृच्छया॥२॥कात्वंकंजपलासाक्षिकुतोवा
किंचिकीर्षसि॥कस्यासिवद वामोरु मथ्नंतीवमनांसिनः॥३॥नवयंत्वाम
रैः दैत्यैः सिद्धगंधर्वचारणैः॥नास्पृष्टपूर्वांजानीमोलोकेशैश्चकुतोनृभिः॥४॥
नूनंत्वंविधिनासुभ्रुःप्रेषितासिशरीरिणां॥सर्वेंद्रियमनःप्रीतिंविधातुंसघृ
णेनकिं॥५॥सात्वंनःस्पर्द्धमानानामेकवस्तुनिमानिनि॥ज्ञातीनांबद्धवैराणां राम०
शंविधत्स्वसुमध्यमे॥६॥वयंकश्यपदायादाभ्रातरःकृतपौरुषाः॥विभजं २२

या ॥३७॥ मिथः कलिरभूत्तेषां तदर्थं तर्षचेतसां ॥ अहं पूर्वमहं पूर्वं न त्वं न त्वमि
ति प्रभो ॥३८॥ देवाः स्वभागमर्हन्ति ये तुल्यायासहेतवः ॥ सत्रयागाय चैतस्मिन्नेष
धर्मः सनातनः ॥३९॥ इति स्वान्प्रतिषेधन्वै दैत्या जातमत्सराः ॥ दुर्बलाः प्र
बलान्राजन्गृहीतकलशान्मुहुः ॥४०॥ एतस्मिन्नंतरे विष्णुः सर्वोपायविदीश्व
रः ॥ योषिद्रूपमनिर्देश्यं दधार परमाद्भुतं ॥४१॥ प्रेक्षणीयोत्पलश्यामं सर्वाव
यवसुंदरं ॥ समानकर्णाभरणसुकपोलोन्नसाननं ॥४२॥ नवयौवननिर्वृत्तस्त
नभारकृशोदरं ॥ मुखामोदानुरक्तालिझंकारोद्विग्नलोचनं ॥४३॥ बिभ्रत्स्व
केशभारेण मालामुत्फुल्लमल्लिकां ॥ सुग्रीवकंठाभरणं सुभुजांगदभूषितां
॥४४॥ विरजांबरसंवीतनितंबद्वीपशोभया ॥ कांच्या प्रविलसद्वल्गुचलच्चरण
नूपुरं ॥४५॥ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकितैः ॥ दैत्ययूथपचेतस्सु

श्रीभा०अ० २२

पयोषवासांसि परिधायाहतानि ते ॥ कुशेषु प्राविशन्सर्वे प्रागग्रेष्वभिभूषिता ॥१५॥
प्रग्मुखेषुपविष्टेषु सुरेषु दितिजेषु च ॥ धूपामोदितशालायां जुष्टायां माल्यदीपकैः
॥१६॥ तस्यां नरेंद्र करभोरूरुशद्दुकूल श्रोणीतटालसगतिर्मदविह्वलाक्षी ॥ सा कू
जती कनकनूपुरसिंजितेन कुंभस्तनी कलशपाणिरथाविवेश ॥१७॥ तां श्री
सखीं कनककुंडलचारुकर्ण नासाकपोलवदनां परदेवताख्यां ॥ संवीक्ष्य संमु
मुहुरुस्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकांतां ॥१८॥ असुराणां सु
धादानं सर्पाणामिव दुर्नयं ॥ मत्वा जातिनृशंसानां न तां व्यभजदच्युत ॥१९॥
कल्पयित्वा पृथक्पंक्तीरुभयेषां जगत्पतिः ॥ तांश्चोपवेशयामास स्वेषु च पंक्ती
षु पृथक् ॥२०॥ दैत्यान्गृहीतकलशो वंचयन्नुपसंचरैः ॥ दूरस्थान्पाययामास
जरामृत्युहरां सुधां ॥२१॥ ते पालयंतः समयमसुराः स्वकृतं नृप ॥ तूष्णीमासन्

स्क० २२

स्वयथान्यायंनैवभेदोयथाभवेत् ॥७॥ इत्युपामंत्रितोदैत्यैर्मायायोषिद्वपुर्हरिः ॥ प्र
हस्यरुचिरापांगैर्निरीक्षन्निदमब्रवीत् ॥८॥ श्रीभगवानुवाच ॥ कथंकश्यपदाया
दाःपुंश्चल्यामयिसंगताः ॥ विश्वासंपंडितोजातुकामिनीषुनयातिहि ॥९॥ श्पालो
वृकाणांस्त्रीणांचस्वैरिणीनांसुरद्विषः ॥ सख्यान्याहुरनित्यानि[illegible]नूत्नंनू
त्नंविचिन्वतां ॥१०॥ श्रीशुकउवाच ॥ इतितेक्ष्वेलितैस्तस्याआश्वस्तमनसो
सुराः ॥ जहसुर्भा[illegible]वगंभीरंददुश्चामृतभाजनं ॥११॥ ततोगृहीत्वामृतभाजनं
हरिर्बभाषईषत्स्मितशोभयागिरा ॥ यद्यभ्युपेतंक्वचसाधुसाधुवा ॥ कृतंम
यावोविभजेसुधामिमां ॥१२॥ श्रीशुकउवाच ॥ इ[illegible]तभिवाहृतंतस्याआ
कर्ण्यासुरपुंगवाः ॥ अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत ॥१३॥ अथोपोष्यकृत
स्नानाहुत्वाचहविषानलं ॥ दत्वागोविप्रभूतेभ्यःकृतस्वस्त्ययनाद्विजैः ॥१४॥ यथो

श्रीभा० अ०
२२

नेयत् ॥२९॥ इति श्रीमद्भागवते महा० अष्टमस्कंधे अमृतमंथने नवमोऽध्यायः ॥९॥
दसमे मत्सराद्दैत्यैरारब्धे तु मृधे सुरैः ॥ दैत्यमाया विषक्तेषु देवेष्वाविर्बभौ हरिः ॥
१॥ ॥श्रीशुक उवाच ॥ इति दानवदैतेया नाविंदन्नमृतं नृप ॥ युक्ताः कर्मणि
यत्ताश्च वासुदेवपराङ्मुखाः ॥१॥ साधयित्वामृतं राजन्पाययित्वा स्वका
न्सुरान् ॥ पश्यतां सर्वभूतानां ययौ गरुडवाहनः ॥२॥ सपत्नानां परामृद्धिं
दृष्ट्वा ते दितिनंदनाः ॥ अमृष्यमाणा उत्पेतुर्देवान्प्रत्युद्यतायुधाः ॥३॥ ततः सु
रगणाः सर्वे सुधया पीतयैधिताः ॥ प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः
॥४॥ तत्र दैवासुरो नाम रणः परमदारुणः ॥ रोधस्युदन्वतो राजंस्तुमुलो रो
महर्षणः ॥५॥ तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे ॥ समासाद्यासिभिर्बा राम०
णैर्निजघ्नुर्विविधायुधैः ॥६॥ शंखतूर्यमृदंगानां भेरीडमरिणां महान् ॥ २२

न्हतन्नेहाः स्त्रीविवादजगुस्तथा ॥ २२ ॥ तस्यां कृतातिप्रणयाः प्रणयापायकातराः ॥ बहुमानेन यावद्धा नोचुः किंचनविप्रयं ॥ २३ ॥ स्वलिंगप्रतिच्छन्नः स्वर्भानुर्देवसंसदि ॥ प्रविष्टः सोममपिवच्चंद्रार्काभ्यां च सूचितः ॥ २४ ॥ चक्रेण क्षुरधारेण जहार पिबतः शिरः ॥ हरिस्तस्य कबंधस्तु सुधयाप्लावितोपतत् ॥ २५ ॥ शिरः स्वमरतां नीतमजो ग्रहमचीक्लृपत् ॥ यस्तु पर्वणि चंद्रार्कावभिधावति वैरधीः ॥ २६ ॥ पीतप्रायेमृते देवै भगवाल्लोकभावनः ॥ पश्यतामसुरेंद्राणां स्वरूपं जगहे हरिः ॥ २७ ॥ एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोपि फलेविकल्पाः ॥ तत्रामृतं सुरगणाः फलमंजसापुर्यत्पादपंकजरजः श्रयणान्न दैत्याः ॥ २८ ॥ यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात् ॥ तैरेव सद्भवति यत्क्रियतेपृथक्त्वात्सर्वस्य तद्भवति मूलनिषेचनं

श्रीभा०अ०
२४

भिः ॥१४॥ देवदानववीराणां ध्वजिन्यौ पांडुनंदन ॥ रेजतुर्वीरमालाभिर्यादशामिवसाग
रो ॥१५॥ वैरोचनो बलिः संख्ये सोऽसुराणां चमूपतिः ॥ यानं वैहायसं नाम कामगम
यनिर्मितं ॥१६॥ सर्वसांग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो ॥ अप्रवर्षामनिर्द्देश्यं दृश्यप
मानमदर्शनं ॥१७॥ आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः ॥ वालव्यज
नछत्राग्र्यैरेजे इंदुरिवोदये ॥१८॥ तस्यासन्सर्वतो यानैर्यूथानांपतयोऽसुरा
नमुचिः शंबरो बाणो विप्रचित्तिरयोमुखः ॥१९॥ द्विमूर्धा कालनाभोथ प्रहे
तिर्हेतिरिल्वलः ॥ शकुनिर्भूतसंतापो वज्रदंष्ट्रो विरोचनः ॥२०॥ हयग्रीवः शं
कुशिराः कपिलो मेघदुंदुभिः ॥ तारकश्चक्रदृक्शुंभो निशुंभो जंभउत्कलः ॥२१॥ राम०
अरिष्टोऽरिष्टनेमिश्च मयश्च त्रिपुराधिपः ॥ अन्ये पौलोमकालेया निवातक
वचादयः ॥२२॥ अलब्धभागाः सोमस्य केवलं क्लेशभागिनः ॥ सर्वएतेरणमु २४

हस्त्यश्वरथपत्तीनां नरदंतो निश्वनो भवत् ॥७॥ रथिनो रथिभिस्तत्र पत्तिभिः सह पतयः ॥ हया हयैरिभाश्चेभैः समसज्जंत संयुगे ॥८॥ उष्ट्रैः केचिदिभैः केचित्खरैरपि ययुः खरैः ॥ केचिद्दौरमृगैरन्ये दृप्तैर्भेदाः ॥९॥ गृध्रैः कंकैर्बकैरन्यैः श्येनभासैस्तिमिंगिलैः ॥ शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ॥१०॥ शिवाभिराखुभिः केचित्कृकलासैः शशैर्नरैः ॥ बस्तैरेकेकृष्णसारैर्हंसैरन्ये च शूकरैः ॥११॥ अन्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः ॥ सेनयोरुभयो राजन्विविशुस्तेऽग्रतोऽग्रतः ॥१२॥ चित्रध्वजपटै राजन्नातपत्रैः सितामलैः ॥ महाधनैर्वज्रदंडैर्व्यजनैर्बालचचामरैः ॥१३॥ वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः ॥ स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मि

श्रीभा० अ० २५

इत्त्वलः सहवातापि ब्रह्मपुत्रैररिंदम ॥३१॥ कामदेवेन दुर्मर्ष उत्कलो मातृभिः सह ॥
बृहस्पतिश्चोशनसा नरकेन शनैश्चरः ॥३२॥ मरुतो निवातकवचैः कालेयैर्वसवो
ऽमराः ॥ विश्वेदेवास्तु पौलोमै रुद्राः क्रोधवशैः सह ॥३४॥ त एवमाजावसुराः सु
रेंद्रा ॥ द्वंद्वेन संहत्य च युध्यमानाः ॥ अन्योन्यमासाद्य निजघ्नुरोजसा ॥ जिगी
षवस्तीक्ष्णशरासितोमरैः ॥३५॥ भुशुंडिभिश्चक्रगदार्ष्टिपट्टिशैः शक्त्युल्मुकैः
प्रासपरश्वधैरपि ॥ निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिंडिपालैश्च शिरांसि चि
च्छिदुः ॥३६॥ गजास्तुरंगाः सरथाः पदातयः ॥ सारोहवाहा युधि वै विखंडिताः ॥ नि
कृत्तबाहूरुशिरोधरांघ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ॥३७॥ तेषां पदाघातरथां
गचूर्णितादायोधनादुल्बणउत्थितस्तदा ॥ रेणुर्दिशः खं द्युमणिं च छादयन् ॥ न्यव रामा०
र्ततासृक्स्रुतिभिः परिप्लुतात् ॥३८॥ शिरोभिरुद्धूतकिरीटकुंडलैः संरंभदृष्टिः २५

रथेवहुशोनिर्जितामरा॥२३॥सिंहनादंविमुंचंतःशंखान्दध्मुर्महारवान्॥दृष्ट्वा
सपत्नानुत्सिक्ताच्चलभित्कुपितोभृशं॥२४॥ऐरावतंदिग्गिरिणमारूढोजयति
स्वराट्॥यथाश्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः॥२५॥तस्यासन्सर्वतोदेवानाना
वाहध्वजायुधाः॥लोकपालाःसहगणैर्वाय्वग्निवरुणादयः॥२६॥तेन्योन्यमभि
संसृत्यक्षिपंतोमर्मभिर्मिथः॥आह्वयंतोविशंतोग्रेयुयुधुर्द्वंद्वयोधिनः॥२७॥
युयुधेवलिरिंद्रेणतारकेनगुहोस्यत॥वरुणोहेतिनायुध्यन्मित्रोराजन्प्रहेति
ना॥२८॥यमस्तुकालनाभेनविश्वकर्मामयेनवै॥शंवरोयुयुधेत्वष्ट्रासवित्रा
तुविरोचनः॥२९॥अपराजितेननमुचिरश्विनोवृषपर्वणा॥सूर्योवलिसुतैर्दे
वोवाणज्येष्ठैःशतेनच॥३०॥राहुणाचतथासोमःपुलोमायुयुधेऽनिलः॥निशुं
भशुंभयोर्देवीभद्रकालीतरस्विनी॥३१॥वृषाकपिस्तुजंभेनमहिषेणविभावसुः॥

श्रीभा०अ० नग्नाःशतशःशूलहस्ताविवाससः ॥ छिंधिभिंधीतिवादिन्यस्तथारक्षोगणाःप्र
२६ भो ॥४८॥ ततोमहाघनाव्योम्निगंभीरपरुषस्वना ॥ अंगारान्मुमुचुर्वातैराह
तास्तनयित्नवः ॥४९॥ सृष्टोदैत्येनसुमहावह्निःश्वसनसारथिः ॥ सांवर्तक
इवात्युग्रोविबुधध्वजिनीमधाक् ॥५०॥ ततःसमुद्रउद्वेलःसर्वतःप्रत्यदृश्यत ॥
प्रचंडवातैरुद्धूततरंगावर्तभीषणः ॥५१॥ एवंदैत्यैर्महामायैरलक्ष्यगतिभी
रणे ॥ सृज्यमानासुमायासुविषेदुःसुरसैनिकाः ॥५२॥ नतत्प्रतिविधिंय
त्रविदुरिंद्रादयोनृप ॥ ध्यातःप्रादुरभूत्तत्रभगवान्विश्वभावनः ॥५३॥
ततःसुपर्णांसकृतांघ्रिपल्लवःपिशंगवासानवकंजलोचनः ॥ अदृश्यता राम०
ष्टायुधबाहुरुल्लसत्श्रीकौस्तुभानर्घ्यकिरीटकुंडलः ॥५४॥ तस्मिन्प्रवि २६

परिघैर्दृढैः ॥ महाभुजैः साभरणैः महायुधैः साप्रास्तताभ्रः क्रमोरुभिर्विभो ॥३९॥
कबंधास्तत्र चोत्सेतुः पश्यंतः स्वशिरो हि भि ॥ उद्यतायुधाश्चंडैराधावं तो भरा
न्मृधे ॥४०॥ वलिमहेंद्रं दशभिस्त्रिभिरैरावतं शरैः ॥ चतुर्भिश्च तुरोवाहानेकेना
रोहमार्द्धपत् ॥४१॥ स तानापतततः शक्रस्तावद्भिः शीघ्रविक्रमः ॥ चिच्छेद निशितैर्भ
ल्लैरसंप्राप्तान्हसन्निव ॥४२॥ न सक्रमैतमंवीक्ष्य दुर्मर्षः शक्तिमाददे ॥ तां ज्वलंती
महोल्काभां हस्तस्थामच्छिनद्धरिः ॥४३॥ ततः शूलं ततः प्राशं ततस्तोमरमृष्टयः ॥
यद्यच्छस्त्रं समादद्यात्सर्वं तत्ताच्छिनद्विभुः ॥४४॥ ससर्जाथासुरीमायामंतर्धान गतो
ऽसुरा ॥ ततः प्रा[illegible]रभूच्छैलः सुरानीकोपरिप्रभो ॥४५॥ ततो निपेतुस्तरवो दह्यमा
नाद्दवाग्निना ॥ शिलाः संकटकशिखराश्चूर्णयंतो द्विषद्बलं ॥ ४६॥ महोरगाः समुत्से
तुर्दंदशूकाः सवृश्चिकाः ॥ सिंहव्याघ्रवराहांश्च मर्द्दयंतो महागजाच्च ॥४७॥ यातुधा

श्रीभा० उ० स्कं० ८

सः परयानुकंपया ॥ जघ्नुर्भृशं शस्त्रसमीरणादय स्तांस्तान् रणे यैरभिसंहताः पुरा
॥१॥ वैरोचनायसंरब्धो भगवान् पाकशासनः ॥ उदयच्छद्यदा वज्रं प्रजा हा हेति चुक्रु
शुः ॥२॥ वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरःस्थितं ॥ मनस्विनं सुसंपन्नं विचरंतं
महामृधे ॥३॥ नटवन्मूढ मायाभिर्मायेशान्नो जिगीषसि ॥ जित्वा बालान्निबद्धाक्षान्नटो हरति तद्धनं ॥४॥ आरुरुक्षंति मायाभिरुत्सिसृक्षंति ये दिवं ॥ तान्
दस्यून्विधुनोम्यज्ञान्पूर्वस्माच्च पदादधः ॥५॥ सोहं दुर्नयनस्तेद्य वज्रेण शतपर्वणा ॥
शिरो हरिष्ये मंदात्मन् घटस्व ज्ञातिभिः सह ॥६॥ बलिरुवाच ॥ संग्रामे वर्तमानानां
कालचोदितकर्मणां ॥ कीर्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात् ॥७॥ तदिदं का
लरसनं जनाः पश्यंति सूरयः ॥ न हृष्यंति न शोचंति तत्र यूयमपंडिता ॥८॥ न वयं म
न्यमानानामात्मानं तत्र साधनं ॥ गिरो वः साधुशोच्यानां गृह्णीमो मर्मताडनाः ॥९॥

राम०
२७

हेऽसुरक्षुरक्कर्मजा मायाविनेश्वुर्मे हिनामहीयसा॥ स्वप्नोयथा हिप्रतिबोध
आगते हरिस्मृतिःसर्वविपद्विमोक्षणं॥५५॥ दृष्ट्वामृधेगरुडवाहमि
भारिवाह आविध्यशूलमहिमादयकालनेमि॥ तल्लीलयागरुडमूर्ध्नि
पतद्गृहीत्वा तेनाहनन्नृपसवाहमरींत्र्यधीशः॥५६॥ मालिसुमाल्य
तिवलौयुधिपेततुर्यं चक्रेणकृत्तशिरसावथमाल्यवांस्तं॥ आहत्यति
ग्मगदयाहनदंडजेंद्रं तावच्छिरोऽच्छिनदरेर्नदतोरिणाद्यः॥५७॥ इ
तिश्रीमद्भागवतेमहापुराणे अष्टमस्कंधे दसमोध्यायः॥१०॥ ऐकादशो
नुदेवेषुदैत्यानतिषुनारदः॥देवानवारयच्छुक्रोमृतानदैत्यानजीवय
न्॥१॥ ॥श्रीशुकउवाच॥ अथोसुराप्रत्युपलब्धचेतसः॥परस्यपुं

दादृशे॥नमुचिश्च वलःपाकस्तत्रापेतुस्त्वरान्विताः॥१९॥वचोभिःपरुषैरिंद्रम
र्दयंतोस्य मर्मसु॥शरैरवाकिरंस्तेधाधाराभिरिव पर्वतं॥२०॥हरिन्दशशता
न्याजौहर्यश्वस्यवलःसरैः॥तावद्भिरर्दयामासयुगपल्लघुहस्तवान्॥२१॥शता
भ्यांमातलिंपाकोरथंसावयवंपृथक्॥सकृत्संधानमोक्षेणतदद्भुतमभूद्रणे॥
२२॥नमुचिःपंचदशभिःस्वर्णपुंखैर्महेषुभिः॥आहत्यानदत्संरब्धंसतोयइ
वतोयदः॥२३॥सर्वतःशरकूटेनशत्रुंसरथसारथिं॥छादयामासुरसुराःप्रा
वृट्सूर्यमिवांबुदाः॥२४॥अलक्ष्यमाणस्तमसीवविह्वलः॥विचुक्रुशुर्देवग
णाःसहानुगाः॥अनायकाःशत्रुवलेननिर्जिताः॥वणिक्पथाभिन्ननवोयथा
र्णवे॥२५॥ततस्तुराषाडिषुबद्धपंजराद्विनिर्गतःसाश्वरथध्वजाग्र
णीः॥बभौदिशःखंपृथिवींविरोचयन्स्वतेजसासूर्यइवक्षपात्यये॥२६॥

शुक उवाच ॥ इत्याक्षिप्य विभुर्वीरो नाराचैर्वीरमर्दनं ॥ आकर्णपूर्णैरहनदाक्षेपै
राहतं पुनः ॥१०॥ एवं निराकृतो देवो वैरिणा तथ्यवादिना ॥ नामृष्यत्तदधि
क्षेपं तोत्राहत इव द्विपः ॥११॥ प्राहरत्कुलिशं तस्मै अमोघं परमर्दनः ॥ सयानो
न्यपतद्भूमौ छिन्नपक्ष इवाचलः ॥१२॥ सखायं पतितं दृष्ट्वा जंभो बलिसखः सु
हृत् ॥ अभ्ययात्सौहृदं सख्युर्हतस्यापि समाचरन् ॥१३॥ स सिंहवाह आसाद्य
गदामुद्यम्य रंहसा ॥ जत्रावताडयच्छक्रं गजं च महाबलः ॥१४॥ गदाप्रहा
रव्यथितो भृशं विह्वलितो गजः ॥ जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं य
यौ ॥१५॥ ततो रथो मातलिना हरिभिर्दशशतैर्वृतः ॥ आनीतो द्विपमुत्सृज्य रथमा
रुरुहे विभुः ॥१६॥ तस्य तत्पूजयन्कर्म यन्तुर्दानवसत्तमः ॥ शूलेन ज्वलता तं तु
स्मयमानोऽहनन्मृधे ॥१७॥ सेहे रुजं सुदुर्मर्षां सत्वमालंब्य मातलिः ॥ इंद्रो
जंभस्य संक्रुद्धो वज्रेणापाहरच्छिरः ॥१८॥ जंभं श्रुत्वा हतं तस्य ज्ञातयो नार

श्रीभा०स्क० जाल्लये ॥ कृतो निर्विशतां भारैः गिरीणां पततां भुवि ॥ ३४ ॥ तपःसारमयं त्वाष्टुः द
२९ त्रोयेन विपादितः ॥ अन्ये चापि बलोपेताः सर्वास्त्वैरन्वितस्त्वच ॥ ३५ ॥ सोयं प्रति
हतो वज्रो ममुत्को सुरऽल्पके ॥ नाहं तदादरे दंडं ब्रह्मतेजोप्यकारणं ॥ ३६ ॥
इति शक्रं विषीदंतमाह वागशरीरिणी ॥ नायमुक्षैरपोनाई वंचमर्हति
मयास्मै यद्वरोदत्तो मृत्युर्नैवार्द्रशुष्कयोः ॥ अतोन्यश्चिंतनीयस्ते उपायो मघव
न्नयं ॥ ३८ ॥ तां दैवीं गिरिमाकर्ण्य मघवान्सुसमाहितः ॥ ध्यायन्फेन मथाप
श्यदुपायमुभयात्मकं ॥ ३९ ॥ न शुष्केन न चार्द्रेण जहार नमुचेः शिरः ॥ तं तु राम०
ष्टुवुर्मुनिगणाः माल्यैश्चावाकिरन्विभुं ॥ ४० ॥ गंधर्वमुख्यो जगतुर्विश्वावसुपरा २९
वसू ॥ देवदुंदुभयो नेदुर्नर्तक्योननृतुर्मुदा ॥ ४१ ॥ अन्येप्येवं प्रतिद्वंद्वान्वाघ

निरीक्ष्य पतनां देवः पौरैरभर्दितां रणे ॥ उद्यच्छद्रिपुं हंतुं वज्रं धरो रुषाः ॥२७॥ स तेनै
वाष्टधारेण शिरसी वलपाकयोः ॥ ज्ञातीनां पश्यतां राजन् जहार जनयन् भयं ॥२८॥
नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः ॥ जिघांसुरिंद्रं नृपते चकार परमोद्यमं ॥२
९॥ अश्मसारमयं शूलं घंटावद्धेमभूषणं ॥ प्रगृह्याभ्यद्रवत् क्रुद्धो हतोसीति वि
तर्पयत् ॥३०॥ प्राहिणोद्देवराजाय निनदन्मृगराडिव ॥३०॥ तदापतद्गगनतले
महाजवं विचिच्छिदे हरिरिषुभिः सहस्रधा ॥ तमाहनन्नृपकुलिशेन कंधरे रु
षान्वितः त्रिदशपतिः शिरो हरन् ॥३१॥ न तस्य हि त्वचमपि वज्र ऊर्जितो वि
भेद यः सुरपतिनौजसेरितः ॥ तदद्भुतं परमतिवीर्य वृत्रभि त्तिरस्कृतो नमु
चिशिरोधरत्वचा ॥३२॥ तस्मादिंद्रोऽबिभेच्छत्रोर्वज्रः प्रतिहतो यतः ॥ कि
मिदं दैवयोगेन भूतं लोकविमोहनं ॥३३॥ येन मे पूर्वमद्रीणां यक्षच्छेदः प्र

 केलत्वंचविचत्तगः॥४८॥इतिश्रीमद्भागवते महापुराणे अष्टस्कंधे देवा
 सुरसंग्रामोएकादशोध्याय॥११॥द्वादशेमोहिनीरूपविभ्रमालोकनोन्मु
कं॥भवंतोमोहयामासहरिःपुनरसांत्वयत्॥१॥अमुह्यंतसुराविष्णुमायया
ननतद्भुतं॥इतिवर्हंमहादेवमोहोयमुपवर्ण्यते॥ ॥श्रीशुकउवाच॥वृषध्व
जोनिशम्येदंयोषिद्रूपेणदानवान्॥मोहयित्वासुरगणान्हरिःसोमम
पाययत्॥१॥वृषमारुह्यगिरिशःसर्वभूतगणैर्वृतः॥सहदेव्याययौद्रष्टुंय
त्रास्तेमधुसूदनः॥२॥सभाजितोभगवतासादरंसोमयाभवः॥सूपविष्टउ
वाचरंप्रतिपूज्यस्मयन्हरिं॥३॥महादेवउवाच॥देवदेवजगद्व्यापिन्जगदी 
शजगन्मयः॥सर्वेषामपिभावानांत्वमात्माहेतुरीश्वरः॥४॥आद्यंतावस्ययन्म 

५ उपारमत विग्रहात् ४
न्निवरणाय्यः॥ सूदयामासुरस्त्रौघैर्मृगान्केशरिणो यथा॥ ४२॥ ब्रह्मणा
प्रेषितो देवान् देवर्षिर्नारदो नृप॥ वारयामास विबुधान्दृष्ट्वा दानवसंक्षयं
४३॥ नारद उवाच॥ भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः॥ श्रियाः समेधि
ताः सर्वे त्रिविष्टपं॥ ४४॥ श्रीशुक उवाच॥ संयम्य मन्युसंरंभं मानयंतो मुनेर्वचः॥
उपगीयमाना ऽनुचरैर्ययुः सर्वे त्रिविष्टपं॥ ४५॥ ये ऽवशिष्टा रणे तस्मिन्नार
दानुमतेन ते॥ बलिं विपन्नमादाय अस्तंगिरीमुपागमत्॥ ४६॥ तत्राविनष्टा
वयवान्विद्यमानशिरोधरान्॥ उशना जीवयामास संजीविन्या सुविद्यया॥
४७॥ बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेंद्रियस्मृतिः॥ पराजितो पि नाखिद्यल्लो

श्रीभा० अ० ३१ वायुर्यथाविशतिखंसचराचराख्यं सर्वंतदात्मकतयाऽवगमोऽवरुंत्से ॥११॥ अवतारा
मयादृष्टारममाणस्यतेगुणैः ॥ सोहंतद्द्रष्टुमिच्छामियत्तेयोषिद्वपुर्धृतं ॥१२॥
येनसंमोहितादैत्याः पायिताश्चामृतंसुराः ॥ तद्दिदृक्षव आयाताःपरंकौतूहलंहि
नः ॥१३॥ श्रीशुकउवाच ॥ एवमभ्यर्थितोविष्णुर्भगवान्शूलपाणिना ॥ प्रहस्यभा
वगंभीरंगिरिशंप्रत्यभाषत ॥१४॥ श्रीविष्णुरुवाच ॥ कौतूहलायदैत्यानांयो
षिद्वेषोमयाधृतः ॥ पश्यतासुरकार्याणिगतेपीयूषभाजने ॥१५॥ तत्तेहंदर्श
यिष्यामिदिदृक्षोःसुरसत्तम ॥ कामिनांबहुमंतव्यंसंकल्पप्रभवोदयं ॥१६॥ श्री
शुकउवाच ॥ इतिब्रुवाणोभगवांस्तत्रैवांतरधीयत ॥ सर्वतश्चारयंश्चक्षुर्भवआ
स्तेसहोमया ॥१७॥ ततोददर्शोपवनेवरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे ॥ वि राम० ३१
क्रीडतींकंदुकलीलयालसद्दुकूलपर्यस्तनितंबमेखलां ॥१८॥ आवर्तनोद्वर्तन
कंपितस्तनप्रकृष्टहारोरुभरैःपदेपदे ॥ प्रभज्यमानामिवमध्यतश्चलत्पदप्रवा

धर्मं मिर्स्मन्मदहं वृहिः॥ यतोऽभयस्य नैतानि तत्सत्यं ब्रह्म विद्वान्॥५॥ तवैव चरणां
भोजश्रेयस्कामाः निराशिषः॥ विसृज्योभयतः संगं मुनयः समुपासते॥६॥ त्वं ब्रह्म
पूर्णममृतं विगुणं विशोक॥ मानंदमात्रमविकारमनन्यदन्यत्॥ विश्वस्य हेतुरु
दयस्थितिसंयमानां॥ मात्मेश्वरश्च तदपेक्षतयाऽनपेक्षः॥७॥ एक त्वमेव सद
सत् द्वयंच स्वर्णं कृतां मिवेह न वस्तुभेदः॥ अज्ञानतस्त्वयि जनैर्विहितो विकल्पो
यस्माद्गुणव्यतिकरो निरुपाधिकस्य॥८॥ त्वं ब्रह्म केचिदवयंत्युत धर्ममेके ए
के परं सदसतोः पुरुषं परेशं॥ अन्ये वयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव
यमात्मतंत्रं॥९॥ नाहं परायुरृषयो न मरीचिमुख्या जानंति यद्विरचितं खलु
नाहं । सत्वसर्गाः॥ यन्मायया मुषितचेतस ईश दैत्य मर्त्यादयः किमुत शश्वदभ
द्रवृत्ताः॥१०॥ स त्वं समीहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो भववंधमोक्षौ॥

श्रीभा० ८स्कं०
३२

भवान्याअपिपश्यंत्याःगतह्रीस्तत्पदंययौ॥२५॥सातमायांतमालोक्यविव
स्त्राव्रीडिताभृशं॥निलीयमानावृक्षेषुहसंतीनान्वतिष्ठत॥२६॥ताम
न्वगच्छद्भगवान्भवःप्रमुषितेंद्रियः॥कामस्यचवशंनीतःकरेणुमि
वयूथपः॥२७॥सोनुव्रज्यातिवेगेनगृहीत्वाऽनिछतींस्त्रियं॥केशबं
धेउपानीयबाहुभ्यांपरिषस्वजे॥२८॥सोपगूढाभगवताकरिणा
करिणीयथा॥इतस्ततःप्रसर्पंतीविप्रकीर्णशिरोरुहा॥२९॥आत्मानं
मोचयित्वांगसुरर्षभभुजांतरात्॥प्राद्रवत्सापृथुश्रोणीमायादेव
विनिर्मिता॥३०॥तस्यासौपदवींरुद्रोविष्णोरद्भुतकर्मणः॥प्रत्यपद्यत
कामेनवैरिणेवविनिर्जितः॥३१॥तस्यानुधावतोरेतश्चस्कंदामोघरेतसः॥
शुष्मिणोयूथपस्येववासितामनुधावतः॥३२॥यत्रयत्रापतन्मह्यांरेतस्तस्य

राम०
३२

लनयंतीततस्ततः॥१९॥दिव्यभ्रमत्कंदुकचापलैर्भृशं प्रोद्यत्प्रतारा यतलोललोचनां॥स्वकर्णविभ्राजितकुंडलोल्लसत्कपोलनीलालकमंडिताननां॥२०॥श्लथदुकूलांबरीच विच्युतांसंनह्यतीवामकरेण वल्गुना॥विनिघ्नतीमन्यकरेण कंदुकं विमोहयंतीजगदात्ममायया॥२१॥तांवीक्ष्य देवइतिकंदुकलीलये षद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः॥स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमंतिकउमांस्वगणांश्च वेद॥२२॥तस्याकराग्रात्सतुकंदुकोयदा गतोविदूरंतमनुव्रजन्स्त्रियाः॥वासः ससूत्रंलघुमारुतोऽहरद्भवस्य देवस्यकिलानुपश्यतः॥२३॥एवंतांरुचिरापांगींदर्शनीयांमनोरमां॥दृष्ट्वातस्यांमनश्चक्रे विषज्जंत्यांभवः किल॥२४॥तयापहृतविज्ञानस्तत्कृतस्मरविह्वलः॥

श्रीवत्सांकेन सत्कृतः ॥ आमंत्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥४१॥ आत्मां
शभूतां तां मायां भवानीं भगवान् भवः ॥ संमतामृषिमुख्यानां प्रीत्याचष्टा
ऽथ भारत ॥४२॥ अपि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः ॥
अहं कलानामृषभो विमुह्ये ययाऽवशोऽन्ये किमुतास्वतंत्राः ॥४३॥ यं मामपृ
च्छस्त्वमुपेत्य योगात्समासहस्रांत उपारतं वै ॥ स एष साक्षात्पुरुषः पुराणो
न यत्र कालो विशते न वेदः ॥४४॥ श्रीशुक उवाच ॥ इति तेभिहितस्तात विक्र
मः शार्ङ्गधन्वनः ॥ सिंधोर्निर्मथने येन धृतः पृष्ठे महाऽचलः ॥४५॥ एतन्मु
हुः कीर्तयतोनुशृण्वतो न रिष्यते जातु समुद्यमः क्वचित् ॥ यदुत्तमश्लो
कगुणानुवर्णनं समस्तसंसारपरिश्रमापहं ॥४६॥ असदविषयमंघ्रिं भा
वगम्यं प्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यं ॥ कपटयुवतिवेषो मो
हयन्यः सुरारीन् तमहमुपसृतानां कामपूरं नतोस्मि ॥४७॥ इति श्रीमद्भाग

महात्मनः॥तानिरूप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते॥३३॥सरित्सरःसुशैलेषु
वनेषूपवनेषुच॥यत्रक्वचासन्नृषयस्तत्रसन्निहितोहरः॥३४॥स्कन्नेरे
तसिसोपश्यदात्मानंदेवमायया॥जडीकृतंनृपश्रेष्ठसंन्यवर्त्ततकश्मला
त्॥३५॥अथावगतमाहात्म्यआत्मनोजगदात्मनः॥अपरिज्ञेयवीर्यस्यन
मेनेतदुहाद्भुतं॥३६॥तमविक्लवमव्रीडमालक्ष्यमधुसूदनः॥उवाचपरम
प्रीतोबिभ्रत्स्वांपौरुषींतनुं॥३७॥श्रीभगवानुवाच॥दिष्ट्यात्वंविबुधश्रेष्ठस्वां
निष्ठामात्मनास्थितः॥यन्मेस्त्रीरूपयास्वैरंमोहितोप्यंगमायया॥३८॥कोनु
मेतितरेन्मायांविषक्तस्त्वदृतेपुमान्॥तांस्तान्विसृजतींभावान्दुस्तरा
मकृतात्मभिः॥३९॥सेयंगुणमयीमायानत्वामभिभविष्यति॥मयासमे
ताकालेनकालरूपेणभागशः॥४०॥श्रीशुकउवाच॥एवंभगवताराजन्

श्रीभा०अ०
३४

तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः॥ यमो यमी श्राद्धदेवः छायायाश्च सुतांछृणुः॥
९॥ सावर्णिस्तपती कन्या भार्या संवरणस्य या॥ शनैश्चरस्तृतीयोभूदश्विनौ वडवा
त्मजौ॥१०॥ अष्टमेंतर आयाते सावर्णि[illegible]र्भविता मनुः॥ निर्मोकविरजस्का
द्याः सावर्णितनया नृप॥११॥ तत्र देवाः सुतपसो विरजा अमृतप्रभाः॥ तेषां विरोच
नसुतो वलिरिंद्रो भविष्यति॥१२॥ दत्वेमां याचमानाय विष्णवे यः पदत्रयं॥ राद्धमिं
द्रपदं हित्वा ततः सिद्धिमवाप्स्यति॥१३॥ योसौ भगवता बद्धः प्रीतेन सुतलं पुनः॥
निवेशितोऽधिके स्वर्गादधुनास्ते स्वराडिव॥१४॥ गालवो दीप्तिमान् रामो द्रो
णपुत्रः कृपस्तथा॥ ऋष्यशृंगः पितास्माकं भगवान्बादरायणः॥१५॥ इमे स
प्तर्षयस्तत्र भविष्यंति स्वयोगतः॥ इदानीमासते राजं स्वे स्वे आश्रममंडले॥ राम
१६॥ देवगुह्यात्सरस्वत्यां सार्वभौम इति प्रभुः॥ स्थानं पुरंदराद्धृत्वा वलये दास्य ३०

वतिमहापुराणे ऽष्टमस्कंधे द्वादशोध्यायः ॥१२॥ त्रयोदशेनुवर्ण्यंते सप्तमादिमनुक्रमा
त् ॥ मन्वंतराणि सर्वाणि षड्विधानि पृथक् पृथक् ॥१॥ सप्तमादिमन्वंतराण्याह मनुरित्या
दिना यावदध्यायसमाप्तिः ॥ ॥ श्रीशुक उवाच ॥ मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ॥
सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु ॥१॥ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव
च ॥ नारिष्यंतोथ नाभागः सप्तमो दिष्ट उच्यते ॥२॥ करूषश्च पृषध्रश्च दशमो वसुमा
न्स्मृतः ॥ मनोर्वैवस्वतस्यैते दश पुत्राः परंतप ॥३॥ आदित्या वसवो रुद्रा विश्वेदेवा म
रुद्गणाः ॥ अश्विनावृभवो राजन्निंद्रस्तेषां पुरंदरः ॥४॥ कश्यपोऽत्रिर्वसिष्ठश्च विश्वा
मित्रोथ गौतमः ॥ जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ॥५॥ अत्रापि भगवज्जन्म
कश्यपाददितेरभूत् ॥ आदित्यानामवरजो विष्णुर्वामनरूपधृक् ॥६॥ संक्षेप
तो मयोक्तानि सप्तमन्वंतराणि ते ॥ भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च ॥
७॥ विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे ॥ संज्ञा छाया च राजेंद्र ये प्रागभिहिते तव ॥८॥

धर्मदयोरंशः ॥२५॥ विहंगमाकामगमानिर्वाणरुचयः सुराः ॥ इंद्रश्चवैधृत
स्तेषामृषयश्चारुणादयः ॥२६॥ आर्यकस्यसुतस्तत्र धर्मसेतुरितिस्मृतः ॥
वैधृतायांहरेरंशस्त्रिलोकींधारयिष्यति ॥२७॥ भवितारुद्रसावर्णिराजन्
द्वादशमोमनुः ॥ देववानुपदेवश्चदेवश्रेष्ठादयः सुताः ॥२८॥ ऋतधामाचत
त्रेंद्रोदेवाश्चहरितादयः ॥ ऋषयश्चतपोमूर्त्तिस्तपस्व्याग्नीध्रकादयः ॥२९॥ स्वधा
माख्योहरेरंशः साधयिष्यतितन्मनोः ॥ अंतरंसत्यसहसः सूनृतायांसुतोविभुः ॥
३०॥ मनुस्त्रयोदशोभाव्योदेवसावर्णिरात्मवान् ॥ चित्रसेनविचित्राद्यादेवसा
वर्णिदेहजाः ॥३१॥ देवाःसुकर्मसुत्रामसंज्ञाइंद्रोदिवस्पतिः ॥ निर्मोकतत्त्वदर्शा
द्याभविष्यंत्यृषयस्तदा ॥३२॥ देवहोत्रस्यतनयउपहर्तादिवस्पतेः ॥ योगेश्वरोहरे
रंशोबृहत्यांसंभविष्यति ॥३३॥ मनुर्वाइंद्रसावर्णिःचतुर्दशमएष्यति ॥ उरुगं

तीश्वरः ॥१७॥ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः ॥ भूतकेतुर्दीप्तिकेतुरि
त्याद्यास्तत्सुतान्नृपः ॥१८॥ पारा मरीचिगर्गाद्या देवा इंद्रोद्भुतः स्मृतः ॥ द्युति
मत्प्रमुखास्तत्र भविष्यंत्यृषयस्ततः ॥१९॥ आयुष्मतो वुधारायामृषभो भ
गवत्कला ॥ भवित्री येन संराद्धां त्रिलोकीं भोक्ष्यते द्भुतः ॥२०॥ दशमो ब्रह्मसा
वर्णितपःश्लोकसुतो महान् ॥ तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्वि
जाः ॥२१॥ तत्रापि जन्म भवति हरेर्विश्वसृजो गृहे ॥ अमूर्त्तिरिति विख्या
तो जेनाप्यायते वै जगत् ॥२२॥ हविष्मान्सुकृतिः सत्यो मूर्त्तिस्तदा द्विजाः ॥
सुवासनविरुद्धाद्या देवाः शंभुः सुरेश्वरः ॥२३॥ विषक्सेनो विसूच्यां तु
शंभोः सख्यं करिष्यति ॥ जातः स्वांशेन भगवान् गृहे विश्वसृजो विभुः ॥२४॥
मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् ॥ अनागतास्तत्सुताश्च सत्स

श्रीभा० अ०
३६

चतुर्युगांते कालेन ग्रस्तान् श्रुतिगणान्यथा ॥ तपसा ऋषयो पश्यन्यतो धर्मः स
नातनः ॥४॥ ततो धर्मं चतुष्पादं मनवो हरिणोदिताः ॥ युक्ताः संचारयंत्यद्धा स्वे
स्वे काले महीं नृप ॥५॥ पालयंति प्रजापालाः यावदंतं विभागशः ॥ यज्ञभा
गभुजो देवा ये च तत्रानुकीर्तिताः ॥६॥ इंद्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जि
तां ॥ भुंजानः पाति लोकांस्त्रीन्कामं लोके प्रवर्षति ॥७॥ ज्ञानं चानुयुगं ब्रूते हरिः
सिद्धस्वरूपधृक् ॥ ऋषिरूपधरः कर्म योगं योगेशरूपधृक् ॥८॥ सर्गं प्रजे
शरूपेण दस्यून्हन्यात्स्वराड्वपुः ॥ कालरूपेण सर्वेषामभावाय पृथग्गुणः ॥
९॥ स्तूयमानो जनैरेभिर्मायया नामरूपया ॥ विमोहितात्मभिर्नानादर्शनैर्न
च दृश्यते ॥१०॥ एतत्कल्पविकल्पस्य प्रमाणं परिकीर्तितं ॥ यत्र मन्वंतराण्याहुश्च
तुर्दश पुराविदः ॥११॥ इति श्रीमद्भागवते महा० अष्टम० मन्वादिविभागवर्णनं चतुर्दशः ॥

राम०
३६

मीरवुधाद्याइंद्रसावर्णिवीर्यजाः॥३४॥पवित्राश्चाक्षुषाद्यादेवाः शुचिरिंद्रोभवि~~ष्यति~~
~~इंद्रसावर्णिः चतुर्दशोमनुर्भविष्यति॥३~~ ष्यति॥ अग्निर्बाहुः शुचिःशुद्धो मागधाद्यास्तपस्वि
नः॥३५॥सत्रायणस्यतनयोवृहद्भानुस्तदाहरिः॥विताना यांमहाराजक्रियातंतू
न्वितायिता॥३६॥राजंश्चतुर्दशैतानित्रिकालानुगतानिते॥प्रोक्तान्येभिर्मितःक
ल्पोयुगसाहस्रपर्ययः॥३७॥ इतिश्रीमद्भागवतेमहापुराणेअष्टमस्कंधेमन्वंतरानु
वर्णनंत्रयोदशोध्यायः॥१३॥चतुर्दशेतुसर्वेषांमन्वादीनांयथायथं॥पृथक्कर्मा
णिवर्ण्यंतेभगवद्देशवर्तिनां॥१॥ ॥राजोवाच॥मन्वंतरेषुभगवन्यथामन्वादय
स्त्विमे॥यस्मिन्कर्मणियेयेननियुक्तास्तद्वदस्वमे॥१॥ऋषिरुवाच॥मनवोम
नुपुत्रास्तेमुनयश्चमहीपते॥इंद्रासुरगणाश्चैवसर्वेपुरुषशासनाः॥२॥यज्ञा
दयोयेकथिताःपौरुष्यस्तनवोनृप॥मन्वादयोजगद्यात्रांनयंत्याभिःप्रचोदिताः॥३॥

श्रीभा०स्कं० ऽजितयोधनार्थस्तैः कल्पितस्त्वस्त्ययनोथविप्रान्॥ प्रदक्षिणीकृत्यकृतप्रणामप्र
२७ हादमामंत्र्यनमश्चकार॥७॥ अथारुह्यरथंदिव्यंभ्रगुदत्तंमहारथः॥ सुसग्धरो
थसंनह्यधन्वीखड्गीधृततेषुधिः॥८॥ हेमांगदलसद्बाहुःस्फुरन्मकरकुंडलः॥ ररा
जरथमारूढोधिष्ण्यस्थइवहव्यवाट्॥९॥ तुल्यैश्वर्यबललक्ष्मीभिःस्वयूथैर्दैत्य
यूथपैः॥ पिबद्भिरिवखंदृग्भिर्दहद्भिःपरिधीनिव॥१०॥ वृतोविकर्षन्महतीमा
सुरींध्वजिनींविभुः॥ ययाविंद्रपुरींस्वृद्धांकंपयन्निवरोदसी॥११॥ रम्यामु
पवनोद्यानैःश्रीमद्भिर्नंदनादिभिः॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः॥१२॥
प्रवालफलपुष्पोरुभारशाखामरद्रुमैः॥ हंससारसचक्राह्वकारंडवकुलाकुलाः
नलिन्योयत्रक्रीडंतिप्रमदासुरसेविताः॥१३॥ आकाशगंगयादेव्यावृतांपरिख रामं०
भूतया॥ प्राकारेणाग्निवर्णेनसाट्टालेनोन्नतेनच॥१४॥ रुक्मपट्टकपाटैश्च २७

वलिं पंचर शो विश्वजिता चार्था अयाजयन् ॥ ततोऽसौ स्वर्गमजयद्भया देवानिलिल्ये
रा॥१९॥ ॥राजोवाच॥ वलेः परं त्रयं भूमेः कस्माद्धरिरयाचत ॥ भूत्वेश्वरः कृपणा
वद्ल्धार्थापिववंधतं ॥२०॥ एतद्वेदितुमिच्छामो महत्कौतूहलंहि नः ॥ यज्ञेश्वरस्य
पूर्णस्य वंधनंचाप्यनागसः ॥२१॥ श्रीशुक उवाच ॥ ॥ पराजितश्रीरसुभिश्च हापि
तो हींद्रेण राजन् भृगुभिः स जीवितः ॥ सर्वात्मना तानभजद्भृगून्बलिः ॥ शिष्यो
महात्मार्थनिवेदनेन ॥२२॥ तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन्विश्वजिता त्रि
नाकं ॥ जिगीषमाणं विधिनाऽभिषिच्य महाभिषेकेण महानुभावः ॥२३॥ ततो रथः
कांचनपट्टनद्धो हयाश्च हर्यश्वतुरंगवर्णाः ॥ ध्वजश्च सिंहेन विराजिमानो हु
ताशनादास हविर्भिरिष्टात् ॥२४॥ धनुश्च दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं
च दिव्यं ॥ पितामहस्तस्य ददौ च माला मम्लानपुष्पां जलजं च शुक्रः ॥२६॥ एवं स विप्रा

श्रीभा० अ० र्भिष्टाः खलाभूतद्द्रुहः शठाः ॥ मानिनः कामिनो लुब्धाः एभिर्हीना व्रजंति यत् ॥ २२ ॥
३९ नोदेवधानी सवर्षिणीपतिर्वहिः समंताडुरघैप्रतन्मया ॥ आचार्यदत्तं जलजं
महास्वनं दध्मौ प्रयुंजन्नूभयमिंद्रयोषितां ॥ २३ ॥ मघवांस्तदभिप्रेत्य वलेःप
रमसुद्यमं ॥ सर्वदेवगणोपेतो गुरुमेतदुवाच ह ॥ २४ ॥ भगवानुद्यमो भूयानव
लेर्नः पूर्ववैरिणः ॥ अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः ॥ २५ ॥ नैनं कश्चि
त्कुतो वापि प्रतिव्योढुमधीश्वरः ॥ पिवन्निव मुखेनेदं लिहन्निव दिशो दश
दहन्निव दिशो दृग्भिः संवर्त्ताग्निरिवोत्थितः ॥ २६ ॥ ब्रूहि कारणमेतस्य दुर्द्धर्षत्व
स्यमद्रिपोः ॥ ओजः सहो वलं तेजो मत एतत्समुद्यमः ॥ २७ ॥ गुरुरुवाच ॥ जानामि राम०
मघवंछत्रोरुन्नतेरस्य कारणं ॥ शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः ॥ २८ ॥ ३९
भवद्विधो भवांश्चापि वर्जयित्वेश्वरं हरिं ॥ नास्य शक्तः पुरः स्थातुं कृतांतस्य

द्वारैः स्फटिकगोपुरैः॥ जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मितां॥१५॥ सभाच
त्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युतां॥ शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः॥१
६॥ यत्र नित्यवयोरूपाः श्यामा विरजवाससः॥ भ्राजंते रूपवन्नार्यश्चर्चिभिरि
वव्हयः॥१७॥ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्रजां॥ यत्रामोदमुपादायमा
र्गआवाति मारुतः॥१८॥ हेमजालाक्षनिर्गच्छद्धूमेनागुरुगंधिनां॥ पांडुरेण प्र
तिच्छन्नमार्गे यांति सुरप्रियाः॥१९॥ मुक्तावितानैर्मणिहेमकेतुभि र्नानापताका
वलभीभिरावृतां॥ शिखंडिपारावतभृंगनादितां वैमानिकस्त्रीकलगीतमंगलां॥२०॥ मृदंगशंखानकदुंदुभिःस्वनैःसतालवीणामुरजर्ष्टिवेणुभिः॥
नृत्यैःसवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभयाऽजितप्रभां॥२१॥ यां न व्रजंत्यध

॥श्रीभा० स्कं०

३९

ऽन्ततममितीर्यते ॥ १ ॥ ॥ श्रीशुकउवाच ॥ एवं गृहेषु सक्तेषु देवमाता दितिस्तदा ॥ ह
तेत्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत् ॥ २ ॥ एकदा कश्यपस्तस्या आश्रमं भगवा
न्गात् ॥ निरुत्सवं निरानंदं समाधेर्विरतश्चिरात् ॥ ३ ॥ स पत्नीं दीनवदनां कृ
तासनपरिग्रहः ॥ सभाजितो यथान्यायमिदमाह कुरूद्वह ॥ ४ ॥ अप्यभद्रं नवि
प्राणां भद्रेलोके धुनागतं ॥ न धर्मस्य न लोकस्य मत्योश्छंदानुवर्तिनः ॥ ५ ॥ अपिवा
कुशलं किंचिद्गृहेषु गृहमेधिनि ॥ धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगि
नां ॥ ६ ॥ अपि वातिथयोभ्येत्य कुटुंबासक्तया त्वया ॥ गृहादपूजिता याताः प्रत्यु
त्थानेन वा क्वचित् ॥ ७ ॥ गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ॥ यदि नि
र्यांति ते नूनं फेरुराजगृहोपमाः ॥ ८ ॥ अप्यग्नयस्तु वेलायां न हुता हविषा सति ॥

रामं०

त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ॥ ९ ॥ यत्पूजया कामदुघान्यां

३९

ति लोकान्गृहान्विताः ॥ ब्राह्मणोग्निश्च वै विष्णोः सर्वदेवात्मनो मुखं ॥ १० ॥ अपि

यथा यमाः॥२९॥ तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपं॥ यात कालं प्रती
क्षंतो यतः शत्रोर्विपर्ययः॥३०॥ एष विप्रबलोदर्कः संप्रत्यूर्जितविक्रमः॥ ते
षामेवापमानेन ससानुबंधो विनंक्ष्यति॥ एवं सुमंत्रितार्थास्ते गुरुणार्थानुद
र्शिना॥ हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः॥३२॥ देवेष्वथ निलीनेषु
बलिर्वैरोचनः पुरीं॥ देवधानीमधिष्टाय वशं निन्ये जगत्रयं॥३३॥ तं वि
श्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः॥ शतेन हयमेधानामनुव्रतमयाजयन्॥
३४॥ ततस्तदनुभावेन भुवनत्रयविश्रुतां॥ कीर्तिं दिक्षु वितन्वानः स रेज उडु
राडिव॥३५॥ बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलंभितां॥ कृतकृत्यमिवात्मा
त्मानं मन्यमानो महामनाः॥३६॥ इति श्रीमद्भागवते महा० अष्टम० पंचदशो
ध्यायः॥१५॥ एवं पुत्रेषु नष्टेषु देवमातादितिस्तदा॥ हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत्॥

श्रीभा०अ०
४०

अहो मायाबलं विष्णोः स्नेहबद्धमिमं जगत् ॥१९॥ क्व देहो भौतिकोऽनात्मा क्व
चात्मा प्रकृतेः परः ॥ कस्य के पतिपुत्राद्या मोह एव हि कारणं ॥१९॥ उ
पतिष्ठस्व पुरुषं भगवंतं जनार्दनं ॥ सर्वभूतगुहावासं वासुदेवं जगद्गुरुं ॥
२०॥ स विधास्यति ते कामान् हरिर्दीनानुकंपिनः ॥ अमोघा भगवद्भक्तिर्ने
तरेति मतिर्मम ॥२१॥ अदितिरुवाच ॥ केनाहं विधिना ब्रह्मन्नुपस्थास्ये ज
गत्पतिं ॥ यथा मे सत्यसंकल्पो विदध्यात्स मनोरथं ॥२२॥ आदिश त्वं द्वि
जश्रेष्ठ विधिं तदुपधावने ॥ आशु तुष्यति मे देवः सीदंत्याः सह पुत्रकैः ॥२३॥
कश्यप उवाच ॥ एतन्मे भगवान्पृष्टः प्रजाकामस्य पद्मजः ॥ यदाह ते प्रव
क्ष्यामि व्रतं केशवतोषणं ॥२४॥ फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ॥ राम०
अर्चयदरविंदाक्षं भक्त्या परमयान्वितः ॥२५॥ सिनीवाल्यां मृदालिप्य स्नाया ४०
त्क्रोडविदीर्णया ॥ यदि लभ्येत वै स्रोतस्येतं मंत्रमुदीरयेत् ॥२६॥ त्वं देव्या

सर्वेकुशलिनस्तवपुत्रामनस्विनि ॥ लक्षयेऽस्वस्थमात्मानंभवत्यालक्षणैरहं ॥
१० ॥ अदितिरुवाच ॥ भद्रंद्विजगवांब्रह्मन्धर्मस्यास्यजनस्यवा ॥ त्रिवर्गस्यपरं
क्षेत्रंगृहमेधिन्गृहाइमे ॥ ११ ॥ अग्नयोऽतिथयोभृत्याभिक्षवोयेचलिप्सवः ॥
सर्वंभगवतोब्रह्मन्ननुध्यानान्नरिष्यति ॥ १२ ॥ कोनुमेभगवन्कामोनसंपद्य
तमानसः ॥ यस्याभवान्प्रजाध्यक्षएवंधर्मान्प्रभाषते ॥ १३ ॥ तवैवमारीचम
नःशरीरजाःप्रजाइमाःसत्वरजस्तमोजुषः ॥ समोभवांस्तासुसुरादिषुप्रभो
तथापिभक्तंभजतेमहेश्वरः ॥ १४ ॥ तस्मादीशभजंत्यामेश्रेयश्चिंतयसुव्र
तः ॥ हृतश्रियोहृतस्थानान्सपत्नैःपाहिनःप्रभो ॥ १५ ॥ परैर्विवासितासाहं
मग्नाव्यसनसागरे ॥ ऐश्वर्यंश्रीभजंत्यामेश्रेयःश्चिंतयत्वांपुनः ॥ १६ ॥ साधो
प्रपद्येन्ममात्मजाः ------ ॥ तथाविधेहिकल्याणंधियाकल्या
णकृत्तमः ॥ १७ ॥ शुकउवाच ॥ एवमभ्यर्थितोदित्याकस्तामाहस्मयन्निव ॥

श्रीभा०अ०
८२

स्तम्भं नमस्ते पीतवाससे ॥३५॥ त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभः ॥ अतस्ते श्रेयसे
धीराः पादरेणुमुपासते ॥३६॥ अन्ववर्त्तंत यं देवाः श्रीश्च तत्पादपद्मयोः ॥ स्पृ
हयंतं दवाग्नोऽहं भगवान्मे प्रशीदतां ॥३७॥ एतैर्मंत्रैर्हृषीकेशमावाहन् पुरस्कृ
तं ॥ अर्च्चेय श्रद्धय श्रद्धायुक्ताः पाद्योपस्पर्शनादिभिः ॥३८॥ अर्चित्वा गंधमा
ल्याद्यैः पयसा स्नापयेद्विभुं ॥ वस्त्रोपवीताभरण पत्रोपस्पर्शनैस्ततः ॥ गंधपु
ष्पादिभिश्चार्चेत् द्वादशाक्षर विद्यया ॥३९॥ श्रतं पयसि नैवेद्यं शाल्यन्नं
विभवे सति ॥ ससर्प्पिः सगुडं दत्वा जुहूयान्मूलविद्यया ॥४०॥ निवेदितं तद्भ
क्ताय दद्याद्भुंजित वा स्वयं ॥ दत्वाचमनमर्चित्वा तांबूलं च निवेदयेत् ॥४१॥ जपे
दशोत्तरशतं स्तवीत स्तुतिभिः प्रभुं ॥ कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दंडवन्मुदा ॥ रामं०
४२॥ कृत्वा शिरसि तच्छेषां देवमुद्वासयेत्ततः ॥ द्व्यवरान्भोजयेद्विप्रान्पा ४१

दिवराहेणरसायास्यानमिछ्छता॥उद्धृतासिनमस्तुभ्यंपाप्मानंमेप्रणाशय॥२७॥
निवर्त्तितात्मनियमोदेवमर्चेत्समाहितः॥अर्चायांस्थंडिलेसूर्येजलेवन्हौ
गुरावपि॥२८॥नमस्तुभ्यंभगवतेपुरुषायमहीयसे॥सर्वभूतनिवासायवा
सुदेवायसाक्षिणे॥२९॥नमोऽव्यक्तायसूक्ष्मायप्रधानपुरुषायच॥
चतुर्विंशद्गुणज्ञायगुणसंख्यानहेतवे॥३०॥नमोद्विशीर्ष्णेत्रिपदे
चतुःशृंगायतंतवे॥सप्तहस्ताययज्ञायत्रयीविद्यात्मनेनमः॥३१॥नमःशिवा
यरुद्रायनमःशक्तिधरायच॥सर्वविद्याधिपतयेभूतानांपतयेनमः॥३२॥न
मोहिरण्यगर्भायप्राणायजगदात्मने॥योगैश्वर्यशरीरायनमस्तेयोगहे
तवे॥३३॥नमस्तआदिदेवायसाक्षिभूतायतेनमः॥नारायणायऋषयेन
मस्तेहरयेनमः॥३४॥नमोमरकतश्यामवपुषेधिगतश्रिये॥केशवायनम

श्रीभा०=अ० ४२

एवद्दद्यात्सुरूषस्तुष्टिदं॥५२॥ आचार्यं ज्ञानसंपन्नं वस्त्राभरणधेनुभिः॥ तोष
यद्दृत्विजश्चैव तद्विद्याराधनं हरेः॥५३॥ भोजयेत्तान्गुणवतो सदन्नेन शुचिस्मि
ते॥ अन्यांश्च ब्राह्मणान्भक्त्या ये चात्र समागताः॥५४॥ दक्षिणां गुरवे दद्यादृ
त्विग्भ्यश्च यथार्हतः॥ अन्नाद्येनाम्बपाकांश्च प्रीणयेत्समुपागतान्॥५५॥ भुक्त
वत्सु च सर्वेषु दीनांधकृपणादिषु॥ विष्णोस्तत्प्रीणनं विद्वान्भुंजीत सहबंधु
भिः॥५६॥ नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः॥ कारयेत्तत्कथाभिश्च
पूजां भगवतोऽन्वहं॥५७॥ एतत्पयोव्रतं नाम पुरुषाराधनं परं॥ पितामहेना
भिहितं मया ते समुदाहृतं॥५८॥ त्वं चानेन महाभागे सम्यक्चीर्णेन केशवं॥ आत्म — राम० ४२
नः शुद्धभावेन नियतात्मा भजाव्ययं॥५९॥ अयं वै सर्वयज्ञाख्यः सर्वव्रतमिति
स्मृतं॥ तपःसारमिदं भद्रे दानं च सुरतर्पणं॥६०॥ त एव नियमाः साक्षात्त एव च

यसेनयथोचितं ॥४३॥ भुंजीततैरनुज्ञातः शेषं सेष्टः समाहितः ॥ ब्रह्मचर्यंधतद्रा
त्रौस्वोभूतेप्रथमेहनि ॥४४॥ स्नातःशुचिर्यथोक्तेनविधिनासुसमाहितः ॥ प
यसस्नापयित्वार्चयेद्यावद्व्रतसमापनं ॥४५॥ पयोभक्षोव्रतमिदं चरेद्विष्णवार्च
नादृतः ॥ पूर्ववज्जुहुयादग्निंब्राह्मणांश्चापिभोजयेत् ॥४६॥ एवंत्वहरहःकुर्या
त्द्वादशाहंपयोव्रतं ॥ हरेराराधनंहोममर्हणंद्विजतर्पणं ॥४७॥ प्रतिपद्दिनमा
रभ्य यावच्छुक्लत्रयोदशी ॥ ब्रह्मचर्यमधःस्वप्नंस्नानंत्रिषवनंचरेत् ॥४८॥ वर्ज
येदसदालापंभोगानुच्चावचांस्तथा ॥ अहिंस्रःसर्वभूतानांवासुदेवपरायणः ॥
४९॥ त्रयोदश्यामथोविष्णोःस्नपनंपंचकैर्विभोः ॥ कारयेच्छास्त्रदृष्टेनविनावि
धिकोविदैः ॥५०॥ पूजांचमहतींकुर्याद्वित्तशाठ्यविवर्जितः ॥ चरुंनिरूप्यपयसि
शिपिविष्टायविष्णवे ॥५१॥ सूक्तेनतेनपुरुषंयजेतसुसमाहितः ॥ नैवेद्यंचातिगु

श्रीभा० स्कं०
४२

आनंदजलाकुलेक्षणा॥ बभूव तत्स्मीपुलकाकुलाकृति॥ सद्दर्शनात्युत्सव
गात्रवेपथुः॥६॥ प्रीत्याशनैर्गद्गदयागिराहरिं तुष्टाव सावेमदितिःकुरूद्वह॥
उद्वीक्षतीसापिवतीवचक्षुषा रमापतिं यज्ञपतिं जगत्पतिं॥७॥ अदितिरुवाच॥
यज्ञेशयज्ञपुरुषाच्युततीर्थपाद तीर्थश्रवःश्रवणमंगलनामधेय॥ आपन्न
लोकवृजिनोपशमोदयाय शंनःकृधीशभगवन्नसिदीननाथः॥८॥ विश्वा
यविश्वभवनस्थितिसंयमाय स्वैरंगृहीतपुरुशक्तिगुणायभूम्ने॥ स्वस्था
यशाश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसेहरयेनमस्ते॥९॥ आ
युःपरंवपुरभीष्टमतुललक्ष्मी द्यौर्भूरसासकलयोगगुणास्त्रिवर्गः॥ ज्ञा
नंचकेवलमनंतभवंतितुष्टा त्वत्तोन्नृणांकिमुसपत्नजयादिराशीः॥१०॥
श्रीशुकउवाच॥ अदित्यैवंस्तुतोराजन्भगवान्पुष्करेक्षणः॥ क्षेत्रज्ञः
सर्वभूतानामितिहोवाचभारत॥११॥ श्रीभगवानुवाच॥ देवमातर्भव

रामः
४२

मखोत्तमा ॥ तपोदानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ॥ ६१ ॥ तस्मादेतद्व्रतं भद्रे
प्रयता श्रद्धयाचर ॥ भगवान्परितुष्टस्ते वरानाशुविधास्यति ॥ ६२ ॥ इति
श्रीमद्भागवते महा० अष्टमस्कंधे कश्यपादितिसंवादो नाम षोडशोध्याय ॥
ततःसप्तदशेऽदित्याकृते तस्मिन्व्रते हरिः ॥ तत्कामपूरणायादौ तत्पुत्रोभू
द्दितीयते ॥ १ ॥ ॥ श्रीशुको वाच ॥ इत्युक्ता साऽदिती राजन्स्वभर्त्रा क
श्यपेन वै ॥ अन्वतिष्ठद्व्रतमिदं द्वादशाहमतंद्रिता ॥ १ ॥ चिंतयंत्येकया बुद्ध्या
महापुरुषमीश्वरं ॥ प्रगृह्येंद्रियदुष्टाश्वान्मनसा बुद्धिसारथिः ॥ २ ॥ मनश्चै
काग्रया बुद्ध्या भगवत्यखिलात्मनि ॥ वासुदेवसमाधाय चचार हपयोव्रतं ॥
३ ॥ तस्याप्रादुरभूद्राजन्भगवानादिपूरुषः ॥ पीतवासाश्चतुर्बाहुः ॥ शंख
चक्रगदाधरः ॥ ४ ॥ तं नेत्रगोचरं वीक्ष्य सहसोत्थाय सादरं ॥ ननाम भुवि का
येन दंडवत्प्रीतिविह्वला ॥ ५ ॥ सोत्थाय बद्धांजलिरीडितुं स्थिता ॥ नोत्सेहे

श्रीभा०स्क०
४४

वेवंरूपमवस्थितं॥१९॥नैतत्परस्माआख्येयंपृष्टयापिकथंचन॥
सर्वंसंपद्यतेदेविदेवगुह्यंसुसंवृतं॥२०॥एतावदुक्त्वाभगवांस्तत्रै
वांतरधीयत॥अदितिर्दुर्लभंलब्ध्वाहरेर्जन्मात्मनिप्रभोः॥२१॥उपाधा
वत्पतिंभक्त्यापरयाकृतकृत्यवत्॥२॥सवैसमाधियोगेनकश्यप
स्तदबुध्यत॥प्रविष्टमात्मनिहरेरंशंसवितथेक्षणः॥२२॥सोदित्यांवी
र्यमाधत्ततपसाचिरसंभृतं॥समाहितमनोराजन्दारुण्यग्निंयथानि
लः॥२३॥अदितेर्धिष्ठितंगर्भंभगवंतंसनातनं॥हिरण्यगर्भोविज्ञाय
समीडेगुह्यनामभिः॥२४॥ब्रह्मउवाच॥जयोरुगायभगवन्नुरुक्रमनमो
स्तुते॥नमोब्रह्मण्यदेवायत्रिगुणायनमोनमः॥२५॥नमस्तेपृश्निग राम ४४
र्भायवेदगर्भायवेधसे॥त्रिनाभायत्रिपृष्ठायशिपिविष्टायविष्णवे॥२६॥

त्यामे विज्ञातं चिरं कांक्षितं ॥ यत्सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः ॥
१२॥ तान्विनिर्जित्य समरे दुर्मदान्सुरर्षभान् ॥ प्रतिलब्धजयश्रीभिः
पुत्रैरिच्छस्युपासितं ॥१३॥ इंद्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषां ॥ स्त्रि
यो रुदंतीरासाद्य द्रष्टुमिच्छसि दुःखिताः ॥१४॥ आत्मजान्सुसमृद्धांस्त्वं प्र
त्याहृतयशःश्रियः ॥ नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि ॥१५॥
प्रायोऽधुनाते ऽसुरयूथनाथा अपारणीया इति देवि मे मतिः ॥ यत्तेऽनुकू
लेश्वरविप्रगुप्ताः न विक्रमस्तत्र सुखं ददाति ॥१६॥ अथाप्युपायो मम दे
वि चिंत्यः संतोषितस्य व्रतचर्यया ते ॥ ममार्चनं नार्हति गंतुमन्यथा श्रद्धानुरू
पं फलहेतुकत्वात् ॥१७॥ त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रते नानु
गुणं समीडितः स्वांशेन पुत्रत्वमुपेत्य ते सुतान् ॥ गोप्तास्मि मारीचतप
स्यधिष्ठितः ॥१८॥ उपाधावपतिं त्वं भद्रे प्रजापतिमकल्मषं ॥ मां च भावयती पत्या

वत्सयांगदोत्नसत्किरीटकांचीगुणचारुनूपरः॥२॥मधुव्रतव्रातविघुष्टयास्वयावि
राजितःश्रीवनमालयाहरिः॥प्रजापतेर्वेश्मतमःस्वरोचिषाविनाशयन्कंठनिवि
ष्टकौस्तुभः॥३॥दिशःप्रसेदुःसलिलाशयास्तदाप्रजाःप्रहृष्टाऋतवोगुणान्वि
ताः॥द्यौरंतरिक्षंक्षितिरग्निजिह्वाःगावोद्विजाःसंजहृषुर्नगाश्च॥४॥श्रोणायां
श्रवणद्वादश्यांमुहूर्तेभिजितिप्रभुः॥सर्वेनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणं॥५॥
द्वादश्यांसवितातिष्ठन्मध्यंदिनगतोनृप॥विजयानामसाप्रोक्तायस्यांजन्मविदुर्ह
रेः॥६॥शंखदुंदुभयोनेदुर्मृदंगपणवानकाः॥चित्रवादित्रतूर्याणांनिर्घोषस्तुमु
लोभवत्॥७॥प्रीताश्चाप्सरसोनृत्यन्गंधर्वप्रवराजगुः॥तुष्टुवुमुनयोदेवाःपितरो
सानुगाग्नयः॥८॥सिद्धविद्याधरगणाःसकिंपुरुषकिंनराः॥चारणायक्षरक्षांसिसु
पर्णाभुजगोत्तमाः॥९॥गायंतोतिप्रमुदितान्नृत्यंतोविबुधानुगाः॥आदित्याश्चाश्व
मपदंकुसुमैसमवाकिरन्॥१०॥दृष्ट्वादितिनिजगर्भसंभवंपरंपुमांसमुद्भवायवि

त्वमादिरंतो भुवनस्य मध्यमनंतशक्तिं पुरुषं जमाहु ॥ कालो भवा नाक्षि
पतीश विश्वं स्त्रोतो यथांतं पतितं गंभीरं ॥२७॥ त्वं वै प्रजानां स्थिरजं
गमानां प्रजापतीनामसि संभविष्णु ॥ दिवौकसां देव दिवश्च्युतानां प
रायणं नौरिव मज्जतोप्सु ॥२८॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे भ
गवदवतारः सप्तदशोध्याय १७॥ ततस्त्वष्टादशोभूत्वा वामनः सत्लतो
दिविले ॥ यज्ञं गतस्ततस्तेन सत्कृतो ल्कोवरान्वृणु ॥१॥ ॥ श्रीशुक उ० ॥
इत्थं विरिंचस्तुतकर्मवीर्यः प्रादुर्बभूवाऽमृतभूरदित्यां ॥ चतुर्भु
जः शंखगदाब्जचक्रः पिसंगवासा नलिनायतेक्षणः ॥१॥ श्यामावदा
तो झषराजकुंडलत्विषोल्लसछ्रीवदनांबुजः पुमान् ॥ श्रीवत्सवक्षाः

श्रीभा० ८१०
४६

जुहोतु द्विजः ॥१९॥ श्रुत्वाश्वमेधैर्यजमानमूर्जितं ॥ बलिं भृगूणामुपकल्पितै-
स्ततः ॥ जगाम तत्राऽखिलसारसंभृतो ॥ भारेण गां सन्नमयन्पदे पदे ॥२०॥
तं नर्मदायास्तट उत्तरे बलेर्य ऋत्विजस्ते भृगुकच्छसंज्ञिके ॥ प्रवर्तयंतो भृ-
गवः क्रतूत्तमं व्यचक्षतारादुदितं यथा रविं ॥२१॥ ते ऋत्विजो यजमानः
सदस्या हतत्विषो वामनतेजसा नृप ॥ सूर्यः किलायात्युत वा विभावसुः
सनत्कुमारोप दिदृक्षया क्रतोः ॥२२॥ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्य-
माणो भगवान्स वामनः ॥ सदंडछत्रं सजलं कमंडलुं विवेश बिभ्रद्धयमे-
धवाटं ॥२३॥ मौंज्या मेखलया वीतमुपवीताजिनोत्तरं ॥ जटिलं वामनं
विप्रं माययामाणवकं हरिं ॥२४॥ प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः ॥
प्रत्यगृह्णन्समुत्थाय संक्षिप्तास्तस्य तेजसा ॥२५॥ यजमानः प्रमुदितो दर्श-
नीयं मनोरमं ॥ रूपानुरूपावयवं तस्मा आसनमाहरत् ॥२६॥ स्वागतेना-

राम०
४६

स्मिताः॥ गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः॥११॥ य
त्तद्वपुर्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः॥ बभूव तेनैव स वाम
नो वटुः संपश्यतोर्दिव्यगतिर्यथा नटः॥१२॥ तं वटुं वामनं दृष्ट्वा मोदमाना मह
र्षयः॥ कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिः॥१३॥ तस्योपनीयमानस्य
सावित्रीं सविताब्रवीत्॥ बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोददात्॥१४॥
ददौ कृष्णाजिनं भूमिर्दंडं सोमो वनस्पतिः॥ कौपीनाच्छादनं माता द्यौश्छ
त्रं जगतः पतेः॥१५॥ कमंडलुं वेदगर्भः कुशान्सप्तर्षयो विदुः॥ अक्षमालां
महाराज सरस्वत्यव्ययात्मनः॥१६॥ तस्मा इत्युपनीताय यक्षराट् पात्रि
कामदात्॥ भिक्षां भगवती साक्षादुमादादंबिका सती॥१७॥ स ब्रह्मवर्चसे
नैव सभां संभावितो वटुः॥ ब्रह्मर्षिगणसंजुष्टामत्यरोचत मारिषः॥१८॥
समिद्धमाहितं वह्निं कृत्वा परिसमूहनं॥ परिस्तीर्य समभ्यर्च्य समद्भिर

श्रीभा० अ० ड्भागवते महा० अष्टम० वलिवामनसंवादे अष्टादशोध्याय ॥१८॥ उन्नविंशे तु हरिणा या
८७ चितेचपदत्रयं॥ प्रतिश्रुते न वलिना ज्ञानमूह गुरु वारयत् ॥१॥ ॥शुक उवाच॥
इतिवैरोचनेर्वाक्यंधर्मयुक्तंससूनृतं॥ निशम्यभगवान्प्रीतःप्रतिनंद्येदमब्रवी
त्॥१॥ श्रीभगवानुवाच॥ वचस्तवैतज्जनदेवशोभनंकुलोचितंधर्मयुतंयश
स्करं॥ यस्यप्रमाणंभृगवःसांपरायेपितामहःकुलवृद्धःप्रशांतः॥२॥ नह्येतस्मि
न्कुलेकश्चिन्निःसत्वःकृपणःपुमान्॥ प्रत्याख्याताप्रतिश्रुत्ययोवादा
ताद्विजातये॥३॥ नसंतितीर्थेयुधिवार्थिनाऽर्थिनाऽर्थिताःपराङ्मुखायेत्व
मनस्विनोनृपाः॥ युष्मत्कुलेयद्यशसाऽमलेनप्र[illegible]दउद्भातियथोडुपःखे
॥४॥ यतोयातोहिरण्याक्षश्चरन्नेकइमांमहींप्रतिवीरंदिग्विजयेनाऽविं राम०
दतगदायुधः॥५॥ यंविनिर्जित्यकृच्छ्रेणविष्णुःक्ष्मोद्धारआगत॥ नात्माम ८७

भिनंद्याथ पादौ भगवतो वलिः॥ अवनिज्यार्चयामास मुक्तसंगमनोरमं॥२७॥
तत्पादशौचं जनकल्मषापहं सधर्म्मविन्मूर्द्ध्न्यदधात्सुमंगलं॥ यद्देव
देवो गिरिशश्चंद्रमौलिर्द्दधार मूर्द्ध्ना परया च भक्त्या॥२८॥ वलिरुवाच॥ स्वा
गतं ते नमस्तुभ्यं ब्रह्मन् किं करवाम ते॥ ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वार्य
वपुर्द्धरं॥२९॥ अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलं॥ अद्य स्विष्टः क्रतुर
यं यद्भवानागतो गृहान्॥३०॥ अद्याग्नयो मे सुहुताः यथा विधि द्विजात्म
ज त्वच्चरणावनेजनैः॥ हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः
पदैस्तव॥३१॥ यद्यद्वटो वांछसि तत्प्रतीच्छ मे त्वामर्थिनं विप्रसुतानुतर्क
ये॥ गां कांचनं गुणवद्धाम मृष्टं तथान्नपेयमुत वा विप्रकन्यां॥३२॥ ग्रा
मान्समृद्धांस्तुरगान्गजान्वा रथांस्तथार्हत्तम संप्रतीच्छ॥३३॥ इति श्रीम

श्रीभा॰ अ॰ तानप्रमत्तोमनुरहंमानोपप्रहितः॥१३॥पिताप्रह्लादपुत्रस्तेतद्विद्वान्
४८ द्विजवत्सलः॥स्वमायुर्द्विजलिंगेभ्योदेवेभ्योदात्सयाचितः॥१४॥भवा
नाचरितान्धर्मानास्थितोगृहमेधिभिः॥ब्राह्मणैःपूर्वजैःशूरैरन्यैश्चो
द्दामकीर्त्तिभिः॥१५॥तस्मात्त्वत्तोमहीमीषद्वृणेहंवरदर्षभात॥पदानित्रीणि
दैत्येंद्रसंमितानिपदाममः॥१६॥नान्यत्तेकामयेराजन्वदान्याजगदीश्वरा
त॥नैनःप्राप्नोतिवैविद्वान्यावदर्थप्रतिग्रहः॥१७॥बलिरुवाच॥अहोब्राह्मण
दायादवाचस्तेवृद्धसम्मता॥त्वंबालोबालिशमतिःस्वार्थंप्रत्यबुधोयथा॥१८॥मां
वचोभिःसमाराध्यलोकानामेकमीश्वरं॥पदत्रयंयोवृणतेबुद्धिमान्द्वीपदाशु
षं॥१९॥नपुमान्मामुपव्रज्यभूयोयाचितुमर्हति॥तस्माद्वृत्तिकरींभूमिं राम॰
वटोकामंप्रतीच्छमे॥२०॥श्रीवामनउवाच॥यावंतोविषयाःप्रेष्ठास्त्रिलो ४८

जायेन मेनेत्त द्दीर्यं भ्र्यं ऽनुस्मरन् ॥६॥ निशम्यत्तद्वधं भ्राता हिरण्यक

शिपुः पुरा हंतु भ्रात्तहणं क्रुद्धो जगाम निलयं हरेः ॥७॥ तमायांतं समा

लोक्य शूलपाणिं कृतांतवत् ॥ चिंतयामास कालज्ञो विष्णु मायावि

नां वरः ॥८॥ यतो यतो हंतत्रासौ मृत्युः प्राणभृतामिव ॥ अतो हमस्य

हृदयं प्रवेक्ष्यामि परागदृशः ॥९॥ एवं स निश्चित्य रिपोः शरीरमाधाव

तो निर्विविशे सुरेंद्रः ॥ श्वासानिलांतर्हित सूक्ष्म देहस्तत्प्राणरंध्रेण

विविग्नचेताः ॥१०॥ स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो न

नाद ॥ क्ष्मां द्यां दिशः खं विवरान् समुद्रान् विष्णुं विचिन्वन्न ददर्श वीरः ॥

११॥ अपश्यन्निति होवाच मयान्विष्टमिदं जगत् ॥ भ्रातृहा मे गतो नूनं

यतो नावर्त्तते पुमान् ॥१२॥ वैरानुबंध एतावानामृत्योरिह देहिनां ॥ अ

रं॥ ज्ञानं श्चिकीर्षितं विष्णोः शिष्यप्राह विदां वरः॥२९॥ श्रीगुरुवाच॥ एषवैं
वैरोचने साक्षाद्भगवान् विष्णुरव्ययः॥ कश्यपाददितेर्जातो देवानां कार्य
साधकः॥३०॥ प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता॥ न साधु मन्ये दैत्या
नां महानुपगतोनयः॥३१॥ एषते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतं॥ दा
स्यत्याछिद्य शक्राय मायामाणवको हरिः॥३२॥ त्रिभिः क्रमैरिमाल्लोकान्
विश्वकायः क्रमिष्य सर्वस्वं विष्णवे दत्वा मूढ वर्तिष्यसे कथं॥३३॥ क्रमतो
गां पदैकेन द्वितियेन दिवं विभो॥ स खंच कायेन महता तार्तीयस्य कुतो गतिः॥
३४॥ निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतं॥ प्रतिश्रुतस्य योनीशः प्रतिपा
दयितुं भवान्॥३५॥ न तद्दानं प्रसंसंति येन वृत्तिर्विपद्यते॥ दानं यज्ञस्तपः
कर्म लोके वृत्तिमतो यतः॥३६॥ धर्माय यशसेर्थाय कामाय स्वजनाय च॥

काममजितेंद्रियं ॥ नशक्नुवंतित्रैज्जसर्वेप्रतिपूरयितुंनृप ॥२१॥ त्रिभिःक्र
मैरसंतुष्टो द्वीपेनापिनपूर्यते ॥ नववर्षसमेतेनसप्तद्वीपवरेछया ॥२२॥
सप्तद्वीपाधिपतयोनृपावैन्यगयादयः ॥ अर्थैःकामैर्गतानांतंतृष्णा
याःइतिनःश्रुतं ॥२३॥ यदृछयोपपन्नेनसंतुष्टोवर्त्ततेसुखं ॥ नासंतुष्ट
स्त्रिभिर्लोकैरजितात्मोपसादितैः ॥२४॥ पुंसोयंसंसृतेर्हेतुरसंतोषो
मुक्तयेस्मृतः ॥२५॥ यदृछालाभतुष्टस्यतेजोविप्रस्यवर्द्धते ॥ तत्प्रशा
म्यत्यसंतोषादंभसेवाशुशुक्षणिः ॥२६॥ तस्मात्त्रीणिपदान्येववृ
णेत्वद्वरदर्षभात् ॥ एतावतैवसिद्धोहंवित्तंयावत्प्रयोजनं ॥२७॥ श्री
शुकउवाच ॥ इत्युक्तःसहसन्नाहवांछितंप्रतिगृह्यतां ॥ वामनायम
हींदातुंजग्राहजलभाजनं ॥२८॥ विष्णवेक्ष्मांप्रदास्यंतमुशनाअसुरेश्व

श्रीभा० अ०
५०

वद्दतांद्रुतः॥१॥ श्रीशुक उवाच॥ बलिरेवं गृहपतिः कुलाचार्येण भाषितः॥ तूष्णींभू
त्वा क्षणं राजन्नुवाचावहितो गुरुं॥१॥ बलिरुवाच॥ सत्यं भगवता प्रोक्तं धर्मोयं
गृहमेधिनां॥ अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित्॥२॥ स चाहं वित्तलो
भेन प्रत्याचक्षे कथं द्विजं॥ प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा॥३॥
न ह्यसत्यात्परोधर्म इति होवाच भूरियं सर्वं सोढुमलं मन्ये ऋतेलीकपरं न
रं॥४॥ नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात्॥ न स्थानचवनान्मृत्योर्य
था विप्रप्रलंभनात्॥५॥ यद्यद्धास्यति लोकेस्मि[illegible]संपरेतं धनादिकं॥ तस्य त्या
गे निमित्तं किं विप्रस्तुष्येन्न तेन चेत्॥६॥ श्रेयः कुर्वंति भूतानां साधवो दुस्त्यजा
सुभिः॥ दध्यङ्शि[illegible]बिप्रभृतयः को विकल्पो धरादिषु॥७॥ यैरियं बुभुजे ब्रह्म राम०
न्दैत्येन्द्रैरनिवर्त्तिभिः॥ तेषां कालोग्रसील्लोकान्न यशोधिगतं भुवि॥८॥ सुलभा ५०
युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः॥ न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः॥९॥

पंचधा विभजन् वित्तमिहामुत्र च मोदते ॥३७॥ अत्रापि बह्वृचैर्गीतं शृणु मेऽसु
रसत्तम ॥ सत्यमोमिति यत्प्रोक्तं यन्नेत्याहानृतं हि तत् ॥३८॥ सत्यं पुष्पफलं विं
द्यादात्मवृक्षस्य गीयते ॥ वृक्षे जीवति सान स्यादनृतं मूलमात्मनः ॥३९॥ तद्यथा
वृक्ष उन्मूलः शुष्यत्युद्वर्ततेऽचिरात् ॥ एवं नष्टानृतः सद्य आत्मा शुष्येन्न संशयः ॥४०
पराग्रिक्तमपूर्णं वा अक्षरं यत्तदोमिति ॥ यत्किंचिदोमिति ब्रूयात्तेन रिच्येत
वै पुमान् ॥४१॥ भिक्षवे सर्वमों कुर्वन्नालं कामेन चात्मने ॥ अथैतत्पूर्णमभ्या
त्मं यच्च नेत्यनृतं वचः ॥४२॥ सर्वं नेत्यनृतं ब्रूयात्स दुःकीर्त्तेर्वै श्वसन्मृतः ॥ स्त्री
षु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे ॥ गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगु
प्सितं ॥४३॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे वामनप्रादुर्भावे एकोनविं
शोध्यायः ॥१९॥ विंशोत्वनृतभीतोसौ ज्ञात्वापि कपटं हरेः ॥ ददावेवमतो विष्णुः सहसा

श्रीभा०८०
५१

हंमूर्द्धितदपोविश्वपावनीः॥१८॥ तदासुरेंद्रंदिविदेवतागणागंधर्वविद्या
धरसिद्धचारणाः॥ तत्कर्मसर्वेपिगृणंतआर्जवंप्रसूनवर्षैर्ववृषुर्मुदान्वि
ताः॥१९॥ नेदुर्मुहुर्दुंदुभयःसहस्रशोगंधर्वकिंपुरुषकिंनराजगुः॥म
नस्विनानेनकृतंसुदुःकरंविद्वानदाद्यद्रिपवेजगत्त्रयं॥२०॥ तद्वामनंरू
पमवर्द्धताद्भुतंहरेरनंतस्यगुणत्रयात्मकं॥ भूःखंदिशोद्यौर्विवराःपयोधयस्ति
र्यङ्नृदेवाऋषयोयदासत॥२१॥ कायेबलिस्तस्यमहाविभूतेःसहर्त्वि
गाचार्यसदस्यएतत्॥ ददर्शविश्वंत्रिगुणात्मकेषुभूतेंद्रियात्माशय
जीवयुक्तं॥२२॥ रसामचष्टांघ्रितलेथपादयोर्महींमहीध्रान्पुरुषस्यजं राम०
घयोः॥ पतत्रिणोजानुनिविश्वमूर्तेरूर्वोर्गणंमारुतमिंद्रसेनः॥२३॥ संध्यां ५१
विभोर्वाससिगुह्यऐक्षत्प्रजापतीन्जघनेआत्ममुख्यान्॥ नाभ्यांनभःकुक्षि

मनस्विनः कारु।एकस्यशोभनंयदर्थिकामोपनयेनदुर्गतिः॥कुतपुनर्ब्रह्मविदांभ
वादृशांततो वटोरस्यददामिवांछितं॥१०॥यजंतियज्ञंक्रतुभिर्यमादृतोभवंत
आम्नायविधानकोविदाः॥सएषविष्णुर्वरदोस्तुवापरोदास्याम्यमुष्मैक्षिति
मीप्सितांमुने॥११॥यद्यप्यसावधर्मेणमांवध्नीयादनागसं॥तथाप्येनंनहिंसिष्ये
भीतंब्रह्मतनुंरिपुं॥१२॥एषवाउत्तमश्लोकोनजिहासतियद्यशः॥हत्वामेनांह
रेयुद्धेशयीतनिहतोमया॥१३॥श्रीशुकउवाच॥एवमश्रद्धितंशिष्यमनादेशकरं
गुरुः॥शशापदैवप्रहितःसत्यसंधंमनस्विनं॥१४॥दृढंपंडितमान्यज्ञःस्तब्धोस्य
स्मदुपेक्षया॥मत्छासनातिगोयत्वमचिराद्भ्रंश्यसेश्रियः॥१५॥एवंसप्तःस्वगुरुणा
सत्यान्नचलितोमहान्॥वामनायददावेनामचिराद्भ्रंश्यसेश्रियः॥१६॥त्वो
दकपूर्वकं॥१६॥विंध्यावलिस्तदागत्यपत्नीजालकमालिनी॥आनिन्येकलशंहैम
मवनेजन्यपांभृतं॥१७॥यजमानःस्वयंतस्यश्रीमत्पादयुगंमुदा॥अवनिज्याव

श्रीभा०अ०
५२

तैः तूणात्तमावक्षयसायकौ च ॥३२॥ सुनंदमुख्या उपतस्थुरीशं पार्षदमु
ख्यासहलोकपालाः॥ [redacted] स्फुरत्किरीटांगदमीनकुंडलः [redacted] श्रीवत्सरत्नो
त्तममेखलांवरैः॥३३ मधुव्रतस्रग्वनमालयावृतो रराजराजन्भगवानुरु
क्रमः॥ क्षितिं पदैकेन वलेर्विचक्रमे नभः शरीरेण दिशश्च वाहुभिः॥ ३३॥ प
दं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि॥ उरुक्रमस्यांस्यां
घ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः॥३४॥ इति श्रीभागवते महापु
राणे अष्टमस्कंधे विश्वरूपो नाम विंशोत्तमोऽध्यायः॥२०॥ एकविंशे पदा
पूर्त्तिमिषेण वलिवंधनं॥ विष्णुनाहृतमुत्कर्षं तस्य ख्यापयितुं जने॥ उरुक्रम
स्यांघ्रिस्तपसः पारंगतस्त्वमुत्तं ततः किंवत्तं तदाह॥ ॥ ॥ श्रीशुक उवाच॥ सत्यं
समीक्ष्याब्जभवो नखेंदुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात्॥ मरीचिमिश्रा

रामः
५२

षुसासिंधू नूरुक्रमस्योरसि चर्चमालां ॥२४॥ ९ ङ्का ध्वंग धर्मं स्तनयोर्मुरारेर्ऋतं
च सत्यं मनसि स्य थेंदुः ॥ श्रियं च वक्षस्यरविंद हस्तां कंठे च सामानि समस्तरेफान्
॥२५॥ इंद्र प्रधानानमराजनस्य दोःषु तत्कर्णयोः ककुभो द्यौश्च मूर्द्धि ॥ केशेषु मेघा
न्श्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निं ॥२६॥ वाण्यां च छंदांसि रसे
जलेशं भ्रुवो निषेधं च विधिं च पक्ष्मसु अहश्च रात्रिश्च परं पुंसो मन्युं ललाटे
धरस्य वल्लोभं ॥२७॥ स्पर्शे च कामं नृप रेतसांभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञं ॥
छाया सुमृत्युं हसिते च मायां तनू रुहेष्वौषधि जातयश्च ॥२८॥ नदीश्च नाडी
षु शिला नखेषु बुद्धाव जं देव गणान् ऋषिश्च ॥ प्राणेषु गात्रे स्थिर जंगमानि स
र्वाणि भूतानि ददर्श वीरः ॥२९॥ सर्वात्मनीदं भुवनं निरीक्ष्य सर्वे सुराः ॥ कश्म
लमापुरंग सुदर्शनं चक्रमसह्य तेजः धनुश्च शार्ङ्गं स्तनयित्नु घोषं ॥३०॥ पर्जन्य
घोषो जलजः पांचजन्य कौमोदकी विष्णुगदा तरस्विनी विद्याधरोसिः शत चंद्र युक्

श्रीभा०अ०
५२

निश्वनैः॥७॥ जांबुवान् ऋक्षराजस्तु भेरीशब्दैर्मनोजवः॥ विजयं दिक्षु सर्वासु महो
त्सवमघोषयत्॥८॥ महीं सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाचया॥ ऊचुः स्वभर्त्तुरसु
रा दीक्षितस्यात्यमर्षिताः॥९॥ न वा अयं ब्रह्मबंधुर्विष्णुर्मायाविनां वरः॥ द्विज
रूपप्रतिछन्नो देवकार्यं चिकीर्षति॥१०॥ अनेन याचमानेन शत्रुणा वटुरू
पिणा॥ सर्वस्वं नो हृतं भर्त्तुर्न्यस्तदंडस्य बर्हिषि॥११॥ सत्यव्रतस्य सततं दीक्षित
स्य विशेषतः॥ नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः॥१२॥ तस्मादस्य वधे
धर्मो भर्त्तुः शुश्रूषणं च नः॥ इत्यायुधानि जगृहुर्बलेरनुचरासुराः॥१३॥ ते सर्वे
वामनं हंतुं शूलपट्टिशपाणय॥ अनिछतो बले राजन् प्राद्रवन्जातमन्यप्रव
लो बलो कुमुदः॥ कुमुदाक्षश्च विष्वक्सेन पतत्रिराट्॥१६॥ जयंतश्रुतदेवश्च राम०
पुष्पदंतोथसात्वतः॥ सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीं॥१७॥ हन्यमा ५२

ऋषयो बृहद्व्रताः सनंदनाद्या नरदेवयोगिनः ॥ १ ॥ वेदोपवेदा नियमा यमान्वि
तास्तर्केतिहासांगपुराणसंहिताः ॥ ये चापरे योगसमीरदीपितज्ञानाग्निना
रंधितकर्मकर्मकल्मषाः ॥ २ ॥ ववंदिरे यत्स्मरणानुभावतः स्वायंभुवं धाम गता
अकर्मकं ॥ अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोर्हणोदकं ॥ समर्च्य
भक्त्याभ्यगृणाच्छुचिश्रवा यन्नाभिपंकेरुहसंभवः स्वयं ॥ ३ ॥ धातुः कमंडलजलं
तदुरुक्रमस्य पादावनेजनपवित्रतया नरेंद्र ॥ स्वर्धुन्यभूदंभसि या पतंती
निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्त्तिः ॥ ४ ॥ ब्रह्मादयो लोकनाथाः स्वनाथा
य समादृताः सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ॥ ५ ॥ तोयैः समर्हणैः
स्रग्भिर्दिव्यगंधानुलेपनैः ॥ धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलांकुरैः ॥ ६ ॥
स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमांकितैः ॥ नृत्यवादित्रगीतैश्च शंखदुंदुभि

श्रीभा० अ० व बंधवारुणैः पाशैर्वलिं सौत्येहनि क्रतौ ॥२६॥ हाहाकारो महानासीद्रोदस्योः स
५४ र्वतो दिशं ॥ निगृह्यमाणे सुरपतौ विष्णुना प्रभविष्णुना ॥२७॥ तं वद्धं वारुणैः पा
शैर्भगवानाह वामनः ॥ नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप ॥२८॥ पदानि त्री
णि दत्तानि भूमेर्मह्यं त्वयासुर ॥ द्वाभ्यां क्रांता मही सर्वा तृतीयमुपकल्पय ॥२९॥
यावत्तपत्यसौ गोभिर्यावदिंदुः सहोडुभिः ॥ यावद्वर्षति पर्जन्यस्तावती भूरि
यं तव ॥३०॥ पदैकेन मयाक्रांतो भूर्लोकः खं दिशस्तनोः स्वर्लोकस्ते द्विती
यपश्यतस्ते स्वमात्मना ॥३१॥ प्रतिश्रुतमदातुस्ते निरये वास इष्यते ॥ विशत्वं
निरयं तस्माद्गुरुणा चानुमोदितः ॥३२॥ वृथा मनोरथस्तस्य दूरे स्वर्गः पपत
त्यधः ॥ यो विप्राय प्रतिश्रुत्यनतर्पयतेर्थिनः ॥३३॥ विप्रलब्धो ददामीति त्वया
हं चाढ्यमानिना ॥ तद्व्यलीकफलं भुंक्ष्व निरयं कतिचित्समाः ॥३४॥ इति श्रीमद्भा राम०
गवते महापुराणेऽष्टमस्कंधे वलिनिग्रहो नामैकविंशोऽध्यायः ॥२१॥ ॥ द्वाविंसे तु नारा ५४

नीन्स्वकान्दृष्ट्वापुरुषोनुचरैर्वलिः॥वारयामाससंरब्धान्काव्यसापमनुस्मर
रन्॥१८॥हेविप्रचित्तेहेराहोहेनेमेश्रूयतांवचः॥मायुध्यतनिवर्त्तध्वंननः
कालोयमर्थकृत्॥१९॥यःप्रभुःसर्वभूतानांसुखदुःखोपपत्तये॥तंनातिवर्त्ति
तुंदैत्यापौरुषैरीश्वरःपुमान्॥२०॥योनोभवायप्रागासीदभवायदिवौकसां
॥सएवभगवानद्यवर्त्ततेतद्विपर्ययं॥२१॥बलेनसचिवैर्बुध्यादुर्गैर्मंत्रौषधा
दिभिः॥सामादिभिरुपायैश्चकालंनात्येतिवैजनः॥२२॥भवद्भिर्निर्जिताह्ये
तेवहुशोनुचरैहरेः॥दैवेनर्द्धैस्तएवाद्ययुधिजित्वानदंतिनः॥२३॥एता
न्वयंविजेष्यामोयदिदैवंप्रसीदति॥तस्मात्कालंप्रतीक्षध्वंयोनोर्थत्वायकल्प
ते॥२४॥श्रीशुकउवाच॥पत्युर्निगदितंश्रुत्वादैत्यदानवयूथपाः॥रसांनिर्विविश्
राजन्विष्णुपार्षदताडिताः॥२५॥अथतार्क्ष्यसुतोज्ञात्वाविराट्प्रभुचिकीर्षितं॥

रिकर्मणा ॥ बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे ॥७॥ पितामहो मे भवदीय
संमतः प्रह्लाद आविष्कृतसाधुवादः ॥ भवद्विपक्षेण विचित्रवैशसं संप्रापि
तस्त्वत्परमः स्वपित्रा ॥८॥ किमात्मनानेन जहाति योंततः किं रिक्थहारैः स्वज
नाख्यदस्युभिः ॥ किं जायया संसृ प्रापितस्त्वत्परमः स्वपित्रा ॥९॥ तिहेतुभू
तया मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥९॥ इत्थं स निश्चित्य पितामहो महानगाध
बोधो भवतः पादपद्मं ॥ ध्रुवं प्रपेदे ह्यकुतोभयं जनान्भीतः स्वपक्षक्षपणस्य
सत्तमः ॥१०॥ अथाहमप्यात्मरिपोस्तवांतिकं दैवेन नीतः प्रसभं त्याजितश्री ॥
इदं कृतांतांतिकवर्त्ति जीवितं यय ध्रुवं ध्वस्तमतिर्न बुध्यते ॥११॥ श्रीशुक उवा
च ॥ तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः ॥ आजगाम कुरुश्रेष्ठ राकाप
तिरिवोत्थितः ॥१२॥ तमिंद्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्ष
णं ॥ प्रांशुं पिशंगांबरमंजनत्विषं प्रलंबबाहुं सुभगं समैक्षत ॥१३॥ तस्मै बलि

प्रसन्नप्रह्वाप्य सुतलं वलि॥ दत्वावरान्हरिर्न्नूत्नं मन्त्रात तत्क्षारं योभवत्॥ सम
र्प्पितः तन्नूचित निर्मलाचल भक्ति तं छलितो वलिना चित्रं स्व मेवार्घ्य पदच्युतः॥॥
॥१॥ श्रीशुक उवाच॥ एवं विप्रकृतो राजन्वलिर्भगवतासुरः॥ भिद्यमानोप्यसि
न्नात्माप्रत्याहा विक्लवं वच॥१॥ वलिरुवाच॥ यद्युत्तमश्लोक भवान्ममेरितंवु
चो व्यलीकं सुरवर्य मन्यते॥ करोम्यृतंसन्न भवेत्प्रलंभनं पदं तृतीयं कुरु शीर्ष्णि
मे निजं॥२॥ विभेम्मि नाहं निरयात्स दच्युतोन पाशवंधा द्व्यसनात् दुरत्ययात्॥
नैवार्थकृच्छ्राद्भवतो विनिग्रहाद साधुवादाद्भृशमुद्विजे यथा॥३॥ पुंसां
श्लाघ्यतमं मन्ये दंडमर्हत्तमोर्पितं॥ यं न माता पिता भ्राता सुहृदश्चादिशंति
हि॥४॥ त्वं नूनमसुराणां नः परोक्षः परमो गुरुः॥ यो नोनेकमदांधानां विभ्रं
शं चक्षुरादिशात्॥५॥ यस्मिन्वैरानुवंधेन रूढेन विवुधेतराः॥ वहबो ल
भिरे सिद्धि यामु हैकांतयोगिनः॥६॥ तेनाहं निगृहीतोस्मि भगवता भवता भू

श्रीभा०अ०
५६

नायमर्हतिनिग्रहं ॥२२॥ कृत्स्नातेनेनदत्ताभूर्लोकाःकर्मार्जिताश्चये ॥ निवे
दितंसर्वस्वमात्माविक्लवमनाःकथमार्त्तिमृछेत् ॥२३॥ श्रीभगवानुवाच ॥ ब्र
ह्मन्यमनुग्रह्णामितद्विशोविधुनोम्यहं ॥ यन्मदःपुरुषःस्तब्धोलोकंमांवा
वमन्यते ॥ यदाकदाचिज्जीवात्मासंसरन्निजकर्मभिः ॥ नानायोनिषनीशो
यंपौरुषींगतिमाव्रजेत् ॥२५॥ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ॥ य
द्यस्यनभवेत्स्तंभस्तत्रायंमदनुग्रहः ॥२६॥ मानस्तंभनिमित्तानांजन्मादीनां
समंततः ॥ सर्वश्रेयःप्रतीपानांहंतमुह्येन्नमत्परः ॥२७॥ एषदानवदैत्यानाम
ग्रणीःकीर्त्तिवर्द्धनः ॥ अजैषीदजयांमायांसीदन्नपिनमुह्यति ॥२८॥ क्षीणरि
क्थःच्युतःस्थानात्क्षिप्तोबद्धश्चशत्रुभिः ॥ ज्ञातिभिश्चपरित्यक्तोयातनामनुया
पितः ॥२९॥ गुरुणाभर्त्सितःशप्तोजहौसत्यंनसुव्रतः ॥ छलैरुक्तोमयाधर्मो
नायंत्यजतिसत्यवाक् ॥३०॥ एषमेप्रापितःस्थानंदुःप्रापममरैरपि ॥ सावर्णेरं

राम०
५६

वीरूणापाशयंत्रितःसमर्हणंनोपजहारपूर्ववत्॥ननाममूर्ध्नाश्रुविलोललो
चनःसव्रीडनीचीनमुखोवभूवह॥१४॥प्रह्लादउवाच॥त्वयैवदत्तंपदमैंद्रमू
र्जितंहृतंतदेवाद्यतथैवशोभनं॥मन्येमहानस्यकृतोमीत्मनोयथा॥ह्यनुग्रहो
विभ्रंशितोयच्छ्रियआत्ममोहनात्॥१६॥ययाहिविद्वानपिमुह्यतेयतस्तत्कोवि
चष्टेगतिमात्मनोयथा॥तस्मैनमस्तेजगदीश्वरायवैनारायणायाखिललोक
साक्षिणे॥१७॥श्रीशुकउवाच॥तस्यानुशृण्वतोराजन्प्रह्लादस्यकृतांज
लेः॥हिरण्यगर्भोभगवानुवाचमधुसूदनं॥१८॥ बद्धंवीक्ष्यपतिंसाध्वीतत्पत्नी
भयविह्वला॥प्रांजलिःप्रणतोपेंद्रंवभाषेवाङ्मुखीनृप॥१९॥विंध्या
वलिरुवाच॥क्रीडार्थमात्मनइदंत्रिजगत्कृतंतेस्वाम्यंतुतत्रकुधियोपरई
शकुर्युः॥कर्तुःप्रभोस्तवकिमस्यतआवहंतित्यक्तह्रियस्त्वदवरोपितकर्तृवा
दा॥श्रीब्रह्मोवाच॥भूतभावनभूतेशदेवदेवजगन्मय॥मुंचैनंहृतसर्वस्वं

भा० अ०
५७

बलिरुवाच ॥ अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः ॥
यल्लोकपालैस्त्वदनुग्रहोमरैरलब्धपूर्वोपसदेसुरेर्पितः ॥२॥ श्रीशुक उवाच ॥
इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः ॥ विवेश सुतलं प्रीतो बलिर्मुक्तः सहा
सुरैः ॥३॥ एवमिंद्राय भगवान् प्रत्यानीय त्रिविष्टपं ॥ पूरयित्वादितेः काममस
शासंसकलं जगत् ॥४॥ लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिं ॥ निशाम्य
भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ॥५॥ प्रह्लादो वाच ॥ नेमं विरंचो लभते प्रसा
दं न श्रीर्न शर्वः किमुतापरे त ॥ यन्नो सुराणामसि दुर्गपालो विश्वाभिवंद्यैरभि
वंदितांघ्रिः ॥६॥ यत्पादपद्ममकरंदनिषेवणेन ब्रह्मादयः शरणदाश्नुवते विभू
तीः ॥ कस्माद्वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥
७॥ चित्रं तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य ॥ राम०
सर्वात्मनः समदृशो विषमः स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः ॥८॥ श्री ५७

तरस्यायंभवितेंद्रोमदाश्रयः॥३१॥तावत्सुतलमध्यास्तांविश्वकर्म्मविनिर्मितं॥य
त्राधयोव्याधयश्चक्लमस्तंद्रापराभवः॥नोपसर्गानिवसतांसंभवंतिममेक्ष
या॥३२॥इंद्रसेनमहाराजयाहिभोभद्रमस्तुते॥सुतलंस्वर्गिभिःप्रार्थ्यंज्ञाति
भिःपरिवारितः॥३३॥नत्वामभिभविष्यंतिलोकेशाःकिमुतापरे॥त्वच्छास
नातिगान्दैत्यांश्चक्रंमेसूदयिष्यति॥३४॥रक्षिष्येसर्वतोहंत्वांसानुगंसप
रिछदं॥सदासन्निहितंवीरतत्रमांद्रक्ष्यतेभवान्॥३५॥तत्रदानवदैत्या
नांसंगात्तेभावआसुरः॥दृष्ट्वामदनुभावंवैसद्यःकुंठोविनंक्ष्यति॥३६॥इ
तिश्रीमद्भागवतेमहा०अष्टमस्कंधेबलिमोक्षणंनामद्वाविंशोध्यायः॥२२॥
त्रयोविंशेबलिर्यातःसुतलंसपितामहः॥उपेंद्रेणदिवंगत्वापूर्ववन्मोदते
हरिः॥१॥श्रीशुकउवाच॥इत्युक्तवंतंपुरुषंपुरातनंमहानुभावोखिलसाधु
संमतः॥बद्धांजलिर्बाष्पकलाकुलेक्षणोभक्त्युत्कलोगद्गदयागिराब्रवीत्॥१॥

श्रीभा० अ० तथापि वदतो भूमन् करिष्याम्यनुशासनं ॥ एतच्छ्रेयः परं पुंसां यत्तवाज्ञानुपालनं ॥
५९ १७॥ श्रीशुक उवाच ॥ अभिनंद्य हरेराज्ञामुशना भगवानिति ॥ यज्ञच्छिद्रं समध
त्त बलेर्विप्रर्षिभिः सह ॥१८॥ एवं बलेर्महीं राजन् भिक्षित्वा वामनो हरिः ॥ द
दौ भ्रात्रे महेंद्राय त्रिदिवं यत्परैर्हृतं ॥१९॥ प्रजापतिपतिर्ब्रह्मा देवर्षिपितृ
भूमिपैः ॥ दक्षभृग्वांगिरोमुख्यैः कुमारेण भवेन च ॥२०॥ कश्यपस्यादितेः प्रीत्यै
सर्वभूतभवाय च ॥ लोकानां लोकपालानामकरोद्वामनं पतिं ॥२१॥ विद्वानां
सर्वदेवानां धर्मस्य च यशःश्रियः ॥ मंगलानां च कल्पं स्वर्गापवर्गयोः उपेंद्रं कल्प
यांचक्रे पतिं सर्वविभूतये ॥२२॥ तदा सर्वाणि भूतानि भृशं मुमुदिरे नृपः ॥
ततस्त्विंद्र पुरस्कृत्य देवयानेन वामनं ॥ लोकपालैः दिवं निन्ये ब्रह्मणा चानुमो
दितः ॥२३॥ प्राप्य त्रिभुवनं चेंद्र उपेंद्रभुजपालितः ॥ श्रिया परमया जुष्टो मुमु राम०
दे गतसाध्वसः ॥२४॥ ब्रह्मा सर्वः कुमारश्च भृग्वाद्या मुनयो नृप ॥ पितरः सर्वभू ५९

भगवानुवाच॥वत्सप्रह्लादभद्रंतेप्रयाहिसुतलालयं॥मोदमानस्वपौत्रेणज्ञा
तीनांसुखमावह॥९॥नित्यंद्रष्टासिमांतत्रगदापाणिमवस्थितं॥मद्दर्शन
महाह्लादध्वस्तकर्मनिबंधनः॥१०॥श्रीशुकउवाच॥आज्ञांभगवतोराजन्
प्रह्लादोबलिनासह॥बाढमित्यमलप्रज्ञोमूर्द्ध्याधायकृतांजलिः॥११॥प
रिक्रम्यादिपुरुषंसर्वासुरचमूपतिः॥प्रणतस्तदनुज्ञातःप्रविवेशमहावि
लं॥१२॥अथाहोशनसंराजन्हरिर्नारायणोंतिके॥आसीनमृत्विजांमध्ये
सदसिब्रह्मवादिनां॥१३॥ब्रह्मन्संतनुशिष्यस्यकर्मछिद्रंवितन्वतः॥य
तत्कर्मसुवैषम्यंब्रह्मदृष्टंसमंभवेत्॥१४॥शुक्रोवाच॥कुतस्तत्कर्मवैषम्यंय
स्यकर्मेश्वरोभवान्॥यज्ञेशोयज्ञपुरुषःसर्वभावेनपूजितः॥१५॥मंत्रतस्तंत्र
तश्छिद्रंदेशकालार्हवस्तुतः॥सर्वंकरोतिनिःछिद्रंनामसंकीर्त्तनंतव॥१६॥

श्रीभा०स्कं०८ कर्मजुगुप्सितं ॥ तमप्रकृतिदुर्मर्षं कर्मग्रस्त इवेश्वरः ॥२॥ एतन्नो भगवन्सर्वं
५९ यथावद्वक्तुमर्हति ॥ उत्तमश्लोकचरितं सर्वलोकसुखावहं ॥३॥ सूत उवाच ॥
इत्युक्तो विष्णुरातेन भगवान्बादरायणिः ॥ उवाच चरितं विष्णोर्मत्स्यरूपे
ण यत्कृतं ॥४॥ श्रीशुक उ० ॥ गोविप्रसुरसाधूनां छंदसामपि चेश्वरः ॥ रक्षामि
च्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥५॥ उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः ॥
नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ॥६॥ आसीदतीतकल्पांते ब्राह्मो
नैमित्तिको लयः ॥ समुपप्लुतास्तत्र लोका भूरादयो नृप ॥७॥ कालेनागतनि
द्रस्य धातुः शिशयिषोर्बली ॥ मुखतो निःसृतान्वेदान् हयग्रीवोंतिकेहरत् ॥
ज्ञात्वा तद्दानवेंद्रस्य हयग्रीवस्य चेष्टितं ॥ दधार शफरीरूपं भगवान्हरिरी राम०
श्वरः ॥९॥ तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् ॥ नारायणपरोतप्यत ५९

तानि सिद्धा वैमानिकाग्रये ॥२५॥ सुमहत्कर्म तद्विष्णोर्गायंत परमाद्भुतं ॥ धि
ष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे ॥२६॥ सर्वमेतानि म्याख्यातं भ
वतः कुलनंदन ॥ उरुक्रमस्य चरितं श्रोतॄणामघमोचनं ॥२७॥ पारं महि
म्न उरुक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः ॥ किं जायमान
उत जात उपैति मर्त्य इत्याह मंत्रदृगृषिः पुरुषस्य यस्य ॥२८॥ य इदं देव
देवस्य हरेरद्भुतकर्मणः ॥ अवतारानुचरितं शृण्वन्याति परां गतिं ॥२९॥
क्रियमाणे कर्मणीदं दैवे पित्र्येथ मानुषे ॥ यत्र यत्रानुकीर्त्यंत तत्तेषां सुकृ
तं विदुः ॥३०॥ इति श्रीमद्भागवते महा० अष्टमस्कंधे वामनावतारचरितत्रयो
विंशोध्यायः ॥२३॥ चतुर्विंशे प्रसंगेन मत्स्यरूपस्य शार्ङ्गिणः लीलालोच्यते यतः
सत्यव्रतरक्षा महार्णवे ॥१॥ ॥ राजोवाच ॥ भगवन्श्रोतुमिहरेरद्भुतकर्म
णः ॥ अवतारकथामाद्यां मायामात्स्यविडंबनं ॥२॥ यदर्थमदधाद्रूपं मात्स्यं लो

श्रीभा० न्त्र० हो सहे ॥ कल्पयैका स्तु विपुलं यत्राहं निवशे सुखं ॥ १८ ॥ सरानां तत्र आदाय न्य
६० धारो दंव नो दके ॥ तत्रा क्षिप्तामुहूर्तेन ह स्तत्रयम वर्द्ध तः ॥ १९ ॥ न मे रा न द्रलं रा
जन्न सुखं व स्तुमुदं वनं ॥ पृथुदोही पदं मह्यं यत्वाहं शरणं गता ॥ २० ॥ तत मे त्रा
दाय सा राज्ञा क्षिप्त्वा राजन् सरोवरे ॥ तदा वृत्यात्मना तो यं महामीनो न्ववव
र्द्धतः ॥ २१ ॥ नैतन्मे स्वस्तये राजन्न उदके सलिलौ करा ॥ निधेहि रक्षायोगेन ह्र
दे मामविदासिनि ॥ २२ ॥ इत्युक्तः सो नयन्मत्स्यं तत्र तत्रा विदासिनि ॥ इत्यु
क्तः सो नयन्मत्स्यं तत्र तत्र जलाशये संमितं तं समुद्रे प्राक्षिपत् ऋषं ॥ २३ ॥ क्षि
प्यमाणस्तमाह इदमिह मां मकरादयः ॥ अदंत्यति बला वीर मां नेहोत्स्रष्टुम
र्हति ॥ २४ ॥ एवं विमोहितस्तेन वदता वल्गुभारती ॥ तमाह को भवानस्मान्म
त्स्यरूपेण मोहयन् ॥ नैवं वीर्यो जलचरो दृष्टो स्माभिः श्रुतोपि वा ॥ यो भ रा म०
६०

पः ससलिलाशनः ॥२०॥ योसाववस्मिन् महाकल्पे ननयः सविवस्वतः ॥ आदिदेव
इतिख्यातो मनुत्वे हरिणार्पितः ॥२१॥ एकदा कृतमालायां कुर्वतो जललं तर्पणं ॥ तस्मांजल्युदके काचित्‌शफर्य्येकाभ्यपद्यतः ॥२२॥ सत्यव्रतो जलिगतां सहतोयेन भारत ॥ उत्ससर्ज नदीतोये सफरीं द्रविडेश्वरः ॥२३॥ तमाह
सातिकरुणं महाकारुणिकं नृपं ॥ यादेभ्यो ज्ञातिघातिभ्यो दीनां मां दीन वत्सल ॥ कथं विसृजसे राजन् भीतामस्मिन् सरिज्जले ॥२४॥ तमात्मनोनुग्रहार्थं प्रीत्या मत्स्यवपुर्द्धरिं ॥ अजानन् रक्षणार्थाय शफर्यास मनो दधे ॥
१५॥ तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः ॥ कलशाप्सु निधायैनां दया
लुर्निन्ये आश्रमः ॥२६॥ सा तु तत्रैकरात्रेण वर्द्धमाना कमंडलो ॥ अलब्ध्वा
त्मावकाशं सोऽइदमाह महीपतिं ॥२७॥ नाहं कमंडलावस्मिन्कृच्छ्रं वस्तुमि

श्रीभा० अ०
६१

रितं ॥३३॥ त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च ॥ सप्तर्षिभिः परिवृतः
सर्वसत्वोपबृंहितं ॥३४॥ आरुह्य बृहतीं नावं विचरिष्यस्यविक्लवः ॥ एकार्णवे
निरालोके ऋषीणामेव वर्चसा ॥३५॥ दोधूयमानां तां नावं समीरेण बलीय
सा ॥ उपस्थितस्य मे शृंगे निबध्नीहि महाहिना ॥३६॥ अहं त्वामृषिभिः साकं स
हनावमुदन्वति ॥ विकर्षन् विचरिष्यामि यावत् ब्राह्मी निशा प्रभो ॥३७॥ म
दीयं महीमानं च परं ब्रह्मेति शब्दितं ॥ वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृ
दि ॥३८॥ इत्थमादिश्य राजानं हरिरंतरधीयत ॥ सोन्ववैक्षत तं कालं हृषी
केशं आदिशत् ॥३९॥ आस्तीर्य दर्भान् प्राक् कूलान् राजर्षिः प्रागुदङ्मुखः ॥ निष
साद हरे पादौ चिंतयन् मत्स्यरूपिणः ॥४०॥ ततः समुद्र उद्वेलः सर्वतः प्लावयन्महीं ॥ राम०
वर्द्धमानो महामेघैर्वर्षद्भिः समदृश्यत ॥४१॥ ध्यायन् भगवदादेशं ददृशे नाव ६१

वान्योजनशतमह्नोभिव्यानसे सरः ॥२६॥ नूनं त्वं भगवान् साक्षाद्धरिर्नाराय
णोव्ययः ॥ अनुग्रहाय भूतानां धत्से रूपं जलौकसां ॥२७॥ नमस्ते पुरुषश्रेष्ठ स्थि
त्युत्पत्त्यप्ययेश्वरः ॥ भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥२८॥ सर्वे
लीलावतारास्ते भूतानां भूतिहेतवः ॥ ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृ
तं ॥२९॥ न तेरविंदाक्षपदोपसर्पणं मृषा भवेत्सर्वसुहृत्प्रियात्मनः ॥ यथेतरे
षां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥३०॥ श्रीशुक उवाच ॥ इति
ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये ॥ विहर्तुकामः प्रलयार्ण
वेब्रवीच्चिकीर्षुरेकांतजनप्रियः प्रियः ॥ श्रीभगवानुवाच ॥ सप्तमेद्यतनादूर्द्ध
महन्येतदरिंदम ॥ निमंक्ष्यत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकं ॥३२॥ त्रिलोक्यां
लीयमानायां संवर्त्ताम्भसि वै तदा ॥ उपस्थास्यति नौः काचित् विशाला त्वां मये

श्रीभा० स्क० ८
६२

नस्याविदुषो विदो गुरुः॥ त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्व
गतिं वुभुत्सतां॥५०॥ जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययंत
मः॥ त्वं त्वव्ययं ज्ञानममोघमंजसा प्रपद्यते येन जनो निजं पदं॥५१॥ त्वं स
र्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिदः॥ तथापि लोको
न भवंतमंधधीर्जानाति संतं हृदि वद्धकामः॥५२॥ तं त्वामहं देववरं वरेण्यं
प्रपद्य ईशं प्रतिवोधनाय॥ छिंध्यर्थदीपैर्भगवान्वचोभिर्ग्रंथीन्हृदय्या
न् हृदय्यान् विवृणु स्वमोकः॥५३॥ श्रीशुक उवाच॥ इत्युक्तवंतं नृपतिं भगवा
नादिपूरुषः॥ मत्स्यरूपी महांभोधौ विहरंस्तत्वमब्रवीत्॥५४॥ पुराणसंहितां
दिव्यां सांख्ययोगक्रियावतीं॥ सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः॥५५॥
श्रुणोषीदृषिभिः साकमात्मतत्वमसंशयं॥ नाव्यासीनो भगवता प्रोक्तं व्र

राम०
६२

मागतां॥तमारुरोह विप्रेंद्रैरादायौषधिवीरुधः॥४२॥ तमूचुर्मुनयः प्रीता राजन्
ध्यायस्व केशवं॥ स वै नः संकटादस्माद् अविता शं विधास्यति॥४३॥ सोनुध्यातस्त
तो राज्ञा प्रादुरासीन्महार्णवे॥ एकशृंगधरो मत्स्यो हैमो नियुतयोजनः॥४५॥
राजोवाच॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः॥ यदृच्छये
होपसृता यमाप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान्॥४६॥ जनोऽबुधोऽयं निजकर्म
बंधनः सुखेच्छया कर्म समीहतेऽसुखं॥ यत्सेवया तां विधुनोत्यसन्मतिं ग्रंथिं स भिं
द्याद्धृदयं स नो गुरुः॥४७॥ यत्सेवयाग्नेरि वरुद्ररोदनं पुमान्विजह्यान्मलमात्म
नस्तमः॥ भजेत वर्णं निजमेष सोऽव्ययो भूयात्स ईशः परमो गुरोर्गुरुः॥४८॥ न यत्
प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयं॥ कर्तुं समेताः प्रभवंति स
र्वस्तमीश्वरं त्वां शरणं प्रपद्ये॥४९॥ अचक्षुरंधस्य यथाग्रणीः कृतस्तथा ज

श्रीभा० अ० ८३ ह्मसनातनं ॥५६॥ अतीतप्रलयापाये उत्थिय स वेधसे ॥ हत्वासुरं हयग्रीवं वेदान् प्रत्याहरद्धरिः ॥५७॥ सतु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः ॥ विष्णोः प्रसादात्कल्पेस्मिन्नासीद्वैवस्वतो मनुः ॥५८॥ सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः ॥ संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ॥५९॥ अवतारो हरेर्योयं कीर्तयेदन्वहं नरः ॥ संकल्पास्तस्य सिद्ध्यन्ति स याति परमां गतिं ॥६०॥ प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा ॥ दितिजमकथयद्यो ब्रह्म सत्यव्रताय तमहमखिलहेतुं जिह्ममीनं नतोस्मि ॥६१॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे मत्स्यावतारचरणोपाख्याने चतुर्विंशोध्यायः ॥२४॥ अष्टमस्कंधे संपूर्णं ॥ श्रीरस्तु ॥ लिख्यते कृतं भट्टपुत्र भजराम को गोमंदराम आत्मपठनार्थे वासी ननवाकोधर ॥ श्रीमस्तु ॥ राम० ८३